दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लैकादशी
आश्विन् 06 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-333 | 1 | सितम्बर 22, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 एशियन्-क्रीडा-प्रतियोगिताः प्रधानमन्त्रिणा मोदि-महोदयेन पदक-विजेतारः अभिनन्दिताः
4 'नौतोड-भूमै निर्धारणीयं मानदण्डम्; केवलम् उपयुक्तेभ्यः आवश्यकतावद्भ्यश्च दीयेत भूमिः- राज्यपालः कवीन्द्रगुप्ता
10 अगस्त्यार्घ्यप्रदान-पार्वणश्राद्ध-महालयानां शास्त्रीयविवरणम्

## भारत-न्यूजीलैण्ड-देशयोः मध्ये मुक्तव्यापारसन्धिः विजयदशमीतः प्रवर्तिष्यते - पीयूषगोयलः



भारत-न्यूजीलैण्ड्-देशयोः मध्ये मुक्तव्यापारसन्धिः अस्य वर्षस्य अक्टूबर्-मासस्य विंशतिदिनाङ्के विजयदशमीतः प्रवर्तिष्यते। नवदेहल्यां वार्ताहरसम्मेलनं सम्बोधयन् वाणिज्योद्योगमन्त्री पीयूषगोयलः उक्तवान् यत् अनेन सन्धिना न्यूजीलैण्डदेशाय भारतस्य शतप्रतिशतं निर्यातः शुल्कमुक्तप्रवेशस्य सौविध्यं प्रदास्यति। असौ उक्तवान् यत् एषा रणनीतिकसहमतिः उभयोः देशयोः मध्ये सहकारं अधिकं सुदृढीकर्तुं विद्यमानां प्रतिबद्धतां प्रतिबिम्बयति। अपि च आगामि-चतुर्-पञ्चवर्षेषु वस्तूनां सेवासु च द्विपक्षीयव्यापारस्य मूल्यं प्रायः पञ्चत्रिंशत्सहस्र-कोटिरूप्यकाणि यावत् वर्धयितुं लक्ष्यं निर्धारितम् अस्ति। मन्त्रिणा उक्तं यत् भारत-न्यूजीलैण्ड्-देशयोः मुक्तव्यापारसन्धेः प्रवर्तनेन एतत् लक्ष्यं सुदृढार्थिक-परिणामेषु परिवर्तितं भविष्यति। श्रीगोयलः उक्तवान् यत् अनेन सन्धिना भारतस्य सूक्ष्म-लघु-मध्यमोद्यमेभ्यः, कृषकेभ्यः, हस्तशिल्पिभ्यः तथा हस्ततन्तु-शिल्पकारेभ्यः च महत् लाभं भविष्यति तथा आजीविकायाः नूतनाः अवसराः सृज्यन्ते। सः सूचितवान् यत् न्यूजीलैण्ड्-देशेन अस्य सन्धेः अन्तर्गतं भारतदेशे द्विलक्षकोटिरूप्यकाणां प्रत्यक्षवैदेशिकनिवेशाय प्रतिबद्धता प्रदर्शिता अस्ति। अयं सन्धिः भारतीयनिर्यातेभ्यः वस्त्र-परिधानयोः, औषधीनां, कृषिजन्यवस्तूनां प्रसंस्कृतखाद्यपदार्थानां चादिषु क्षेत्रेषु नूतनान् अवसरान् उद्घाटयिष्यति।

## विश्वस्य पञ्चविंशतिदेशाः भारतीय-औषधिसूचीं मान्यतां ददति इत्येतत् भारतस्य स्वावलम्बनस्य महत्त्वपूर्णा यात्रा प्रदर्शयति- अनुप्रिया पटेलः



स्वास्थ्य-परिवार-कल्याणराज्यमन्त्री अनुप्रिया पटेल् उक्तवती यत् औषधिसुरक्षा-निरीक्षणस्य क्षेत्रे भारतस्य वर्षेभ्यः यात्रा स्वावलम्बनस्य महत्त्वपूर्णम् उदाहरणम् अस्ति। सा नवदेहल्यां राष्ट्रिय-औषधिसूच्याः सप्तम-संस्करणस्य प्रकाशनसमये एतद् वक्तव्यं प्रदत्तवती। मन्त्रिणा उक्तं यत् सम्प्रति देशे एकादश-शताधिकानि प्रतिकूल-औषधि-प्रतिक्रिया-निरीक्षणकेन्द्राणि कार्यं कुर्वन्ति। प्रशासनस्य लक्ष्यं च एतां सङ्ख्यां प्राथमिकस्वास्थ्य-केन्द्रस्तरपर्यन्तं वर्धयितुम् अस्ति। सा एतदपि उक्तवती यत् विश्वस्य पञ्चविंशतिदेशाः भारतीय-औषधिसूचीं मान्यतां ददति तथा स्वकीयेषु दत्तांशेषु तां समावेशयन्ति। भारतं सम्प्रति विश्वस्वास्थ्यसङ्गटनस्य रूग्णसुरक्षा-दत्तांशभाण्डाराय औषधिसुरक्षासम्बद्धान् दत्तांशान् प्रददाति। मन्त्रिणा संसूचितं यत् अस्मिन् क्षेत्रे भारतस्य स्थानं चतुर्दशाधिक-द्विसहस्रतमे वर्षे त्रयोविंशत्यधिकैकशतम् आसीत् यत् स्थानं पञ्चविंशत्यधिक-द्विसहस्र-तमे वर्षे अभिवर्ध्य अष्टमं जातम्।

## एशियाक्रीडासु पुरुषाणां दशमीटर-मितायां एयर-राइफल-स्पर्धायां भारतं द्वे पदके

एशियाक्रीडासु जापानदेशस्य नागोयानगरे आयोजितायां पुरुषाणां दशमीटर-मितायां एयर राइफल-स्पर्धायां भारतं द्वे पदके प्राप्तवत्। हिमांशु-ढिल्लों चतुर् दशांशोत्तर द्विपञ्चाशदधिक द्वि शत अंकैः सह रजतपदकं विजितवान्, रुद्राक्ष-पाटिलः च नव दशांशोत्तर त्रिंशदधिक द्वि शत अंकैः सह कांस्यपदकं प्राप्तवान्। एतत्पूर्व भारतेन पुरुषाणां दशमीटर-मितायां एयर राइफल-दलस्पर्धायाम् अपि रजतपदकं विजितम् आसीत्। मिक्स्ड्-मार्शल्-आर्ट् इत्यस्यां क्रीडायां महिलानां षष्टि-किलोग्राम-मितस्य वर्गस्य उपान्त्यचक्रे सुचिका तारियाल् इत्येषा सिङ्गापुरदेशस्य हुई-हुन्-टो इत्येतां शून्यं द्वि इति अङ्कान्तरालेन पराजित्य कांस्यपदकं विजितवती।

## अद्यतनीयं सुभाषितम्

**असम्भवं हेममृगस्य जन्मः**
**तथापि रामो लुलुभे मृगाय।**
**प्रायः समापन्नविपत्तिकाले**
**धियोऽपि पुंसां मलिना भवन्ति।।**

भावार्थः- प्रायः देखा गया है कि विपत्ति के समय लोगों की बुद्धि भ्रष्ट हो जाती है। इसी कारण राजा रामचन्द्र यह जानते हुए भी कि स्वर्णमृग का जन्म होना असम्भव है वे उसे मारने का लालच कर बैठे।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा



## अमेरिकायाः न्यूयॉर्कनगरे संयुक्तराष्ट्रमहासभायाः एकाशीतितमस्य सत्रस्य उच्चस्तरीय-सप्ताहाय भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति -विदेशमन्त्री

विदेशमन्त्री डॉ. एस्. जयशङ्करः अमेरिकायाः न्यूयॉर्क नगरे संयुक्तराष्ट्रमहासभायाः एकाशीतितमस्य सत्रस्य उच्चस्तरीय-सप्ताहाय भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति। विदेशमन्त्री अस्य मासस्य षड्विंशति-दिनाङ्के संयुक्तराष्ट्र-महासभायाः एकाशीतितमं उच्चस्तरीयसत्रं सम्बोधयिष्यति। स्वयात्रावधौ डॉ. जयशङ्करः विविधेषु बहुपक्षीयेषु द्विपक्षीयेषु च उपवेशनेषु भागं ग्रहीष्यति। तस्य न्यूयॉर्क यात्रा तस्मिन् समये भवति यदा विश्वस्य नेतारः संयुक्तराष्ट्रमुख्यालये सितम्बर-मासस्य द्वाविंशतितः अष्टाविंशति-दिनाङ्कपर्यन्तम् आयोक्ष्यमानायां वार्षिक उच्चस्तरीय-सामान्यचर्चायां सहभागं कर्तुं समागमिष्यन्ति। संयुक्तराष्ट्रमहासभायाः एकाशीतितमं सत्रं "विश्वासस्य पुनर्स्थापनम्, परिवर्तनस्य प्रबन्धनं च सर्वेभ्यः फलप्रदं संयुक्तराष्ट्रम्" इत्यस्य विषयस्य अन्तर्गतं प्रचलति।

# रूसदेशस्य शासनाधिरूढं युनाइटेड् रशियादलं देशस्य संसदीयनिर्वाचने अग्रे अस्ति



रूसदेशस्य शासनाधिरूढं युनाइटेड् रशिया दलं देशस्य संसदीयनिर्वाचने अग्रे अस्ति। केन्द्रीयनिर्वाचनायोगेन प्रकाशित-प्रारम्भिक-परिणामानुसारेण अनेन दलेन प्रायः पञ्च दशांशोत्तर सप्तपञ्चाशत्-प्रतिशतं मतानि प्राप्तानि, यदा तु मतदानप्रतिशतं आहत्य षड् षड् दशांशोत्तर षड्पञ्चाशद् आसीत्। अन्तिमपरिणामः सितम्बर-मासस्य पञ्चविंशतितमे दिनाङ्के यावत् आगमिष्यति इति सम्भाव्यते। पूर्वस्मिन् निर्वाचने युनाइटेड् रशिया-दलेन चतुर्विंशत्यधिक त्रि शतासनानि विजितानि आसन्। यूक्रेनदेशेन सह प्रवर्तमानस्य सङ्घर्षस्य तथा कीव्-पक्षतः रात्रौ कृतस्य बृहद् ड्रोन-आक्रमणस्य मध्ये एतत् निर्वाचनम् अभवत्। रूसदेशस्य अधिकारिभिः उक्तं यत् अस्मिन् आक्रमणे नवदश-शताधिकाः ड्रोन-विमानाः सम्मिलिताः आसन्। आक्रमणे न्यूनातिन्यूनं द्वयोः जनयोः मृत्युः अभवत् अथ च एकस्य तैल-शोधनालयस्य क्षतिः अभवत्।

## क्रीडावार्ता

भारतं त्रिषु स्पर्धासु बाङ्ग्लादेशं त्रीणि शून्यं इत्यंकैः पराजित्य प्रागुपान्त्यचक्रे प्रविष्टम्।
जापान-देशस्य इचिनोमिया-नगरपालिका-व्यायामशालायाम् अजेय भारतं त्रिषु स्पर्धासु बाङ्ग्लादेशं त्रीणि शून्यं इत्यङ्कैः पराजित्य प्रागुपान्त्यचक्रे प्रविष्टम्।

## ऋतुवार्ता

भारतर्तुविज्ञान-विभागेन अण्डमान-निकोबार द्वीपसमूहे, तमिलनाडु-पुडुचेरी-कराईकल-तेलङ्गाना चेत्येषु स्थलेषु प्रबलवृष्टेः पूर्वानुमानं कृतम् अस्ति। आगामिषु द्वित्रिदिवसेषु तटीय-आन्ध्रप्रदेश-छत्तीसगढ-कर्णाटक-मध्य-महाराष्ट्रेषु समानाः ऋतु-परिस्थितयः प्रवर्तिष्यन्ते इति सम्भाव्यते।

# राष्ट्रपतेः श्रीमती-द्रौपदी-मुर्मु-महोदयायाः त्रिदिवसीयः गुजरात-प्रवासः

एकता-नगरे द्विसप्ततितम-राष्ट्रिय-चलच्चित्र-पुरस्काराणां वितरणम्भारतस्य राष्ट्रपतिः श्रीमती द्रौपदी मुर्मु गुजरात-राज्यस्य त्रिदिवसीये आधिकारिक-प्रवासे वर्तते। अस्मिन् प्रवासे राष्ट्रपतिमहोदया केवडिया-क्षेत्रस्य एकता-नगरे तथा वडोदरा-नगरे च आयोज्यमानेषु महत्त्वपूर्णेषु कार्यक्रमेषु भागं ग्रहीष्यति। राष्ट्रपतिः मुर्मु श्वः सायं एकता-नगरे द्विसप्ततितमान् (७२) राष्ट्रिय-चलच्चित्र-पुरस्कारान् प्रदास्यति।

# एकादशः राष्ट्रिय-आयुर्वेद-दिवसः 'स्वस्थ-भविष्याय आयुर्वेदः'



समग्रे राष्ट्रे सितम्बर-मासस्य त्रयोविंशतितमे (२३) दिनाङ्के एकादशः आयुर्वेद-दिवसः आचरिष्यते। अस्य वर्षस्य मुख्य-ध्येयवाक्यम् (विषयः) 'स्वस्थ-भविष्याय आयुर्वेदः' इति वर्तते। आयुष-मन्त्रालयेन विज्ञापितं यत् त्रिंशत् (३०) राज्येषु केन्द्रशासित-प्रदेशेषु च सप्तनवत्यधिक-नवसहस्रात् (९,७००) अपि अधिकाः कार्यक्रमाः आयोजिताः।आयुष-मन्त्रालयस्य कथनानुसारम् उत्तर-प्रदेश-महाराष्ट्र-मध्य-प्रदेश-छत्तीसगढ़-प्रमुखेषु राज्येषु महती सहभागिता दृष्टा। मन्त्रालयेन सूचितं यत् नागरिकाः आयुर्वेद-दिवसस्य अधिकृत-जालस्थानस्य (ayurvedaday.org.in) माध्यमेन कार्यक्रमेषु पञ्जीकरणं विवरण-प्रस्तुतिं च कुर्वन्तः सन्ति। एभिः उपक्रमैः जनजागरणस्य, स्वास्थ्य-संवर्धनस्य, सहभागितायाश्च माध्यमेन नागरिकाः, शैक्षणिक-संस्थानानि, जनसमुदायाः, विविधाः संस्थाः चैकस्मिन् सूत्रे आबद्धाः क्रियन्ते।
२०२६ तमस्य वर्षस्य अस्मिन् एकादशे आयुर्वेद-दिवसे भारतस्य बहिः अपि सहभागिता संलक्षिता। दशभ्यः (१०) देशेभ्यः क्षेत्रेभ्यश्च कार्यकलापानां विवरणानि प्राप्तानि, यत्र नवशताधिक-एकसहस्रात् (१,९००) अपि अधिकाः प्रतिभागिनः सम्मिलिताः अभवन्। भागं गृहीतवत्सु देशेषु क्षेत्रेषु च ब्रिटिश-हिन्द-महासागर-क्षेत्रम्, युनाइटेड किङ्गडम् (ब्रिटेन), अफगानिस्तानम्, बुल्गारिया, स्पेन, अल्जीरिया, ऑस्ट्रेलिया, डेनमार्क, आइसलैण्ड्, संयुक्त-राज्य-अमेरिका च सम्मिलिताः सन्ति।



# एशियन्-क्रीडा-प्रतियोगिताः

## प्रधानमन्त्रिणा मोदि-महोदयेन पदक-विजेतारः अभिनन्दिताः

प्रधानमन्त्री नरेन्द्रमोदी एशियन्-क्रीडा-प्रतियोगितायाः पुरुषाणां दश-मीटर-परिमित-वायोः (१० मी. एयर-राइफल) समूह-स्पर्धायां रजतपदक-प्राप्तये रुद्रांक्ष-बालासाहेब-पाटिलम्, हिमांशु-ढिल्लों, पार्थ-राकेश-माने इत्येतान् क्रीडकान् समभिनन्दितवान्। सामाजिक-माध्यमस्य एकां सन्देश-प्रस्तुतिं कुर्वन् श्रीमोदी अवदत् यत् एतेषां त्रयाणां क्रीडकानाम् उत्कृष्टैकाग्रतया, निरन्तर-प्रदर्शनेन, अनुपम-सामूहिक-सहभावेन च समग्रः देशः गौरवान्वितः सञ्जातः।प्रधानमन्त्रिणा पुरुषाणां दश-मीटर-परिमित-वायोः लक्ष्यभेदन-स्पर्धायां क्रीडकानां व्यक्तिगत-उपलब्धीनामपि भृशं प्रशंसा कृता। सः रजतपदक-विजेतुः हिमांशु-ढिल्लों इत्यस्य धैर्यं सन्तुलितं लक्ष्यभेदन-कौशलं च प्राशंसत्। हिमांशोः अनेन प्रदर्शनेन राष्ट्रं गर्वितम् अस्तीति तेन उक्तम्।कांस्यपदक-प्राप्तये रुद्रांक्ष-बालासाहेब-पाटिलम् अपि अभिनन्द्य श्रीमोदी समग्र-प्रतियोगितायां तस्य एकाग्रतायाः अनुशासनस्य च प्रशंसां कृत्वा आगामि-भविष्यार्थं शुभाशयाः प्रकटितवान्।

# उत्तराखण्ड-राज्ये भारत-मङ्गोलिया-देशयोः संयुक्त-सैन्याभ्यासस्य 'नोमैडिक-एलिफेंट' इत्यस्य अष्टादश-संस्करणस्य समारम्भः




भारत-मङ्गोलिया-देशयोः संयुक्त-सैन्याभ्यासस्य 'नोमैडिक-एलिफेंट' इत्यस्य अष्टादशं संस्करणम् अद्य उत्तराखण्डस्य पिथौरागढ-मण्डले स्थिते वैदेशिक-प्रशिक्षण-केन्द्रे समारब्धम्। अयं युद्धाभ्यासः अक्टूब्बर-मासस्य तृतीय-दिनाङ्कं (३) यावत् प्रवर्तिष्यते। रक्षा-मन्त्रालयेन विज्ञापितं यत् एषः उभयोः देशयोः पर्यायेण (वारं वारम्) आयोज्यमानः वार्षिकः गुल्म-स्तरीयः (प्लाटून-स्तरीयः) अभ्यासः अस्ति। अस्य पूर्वतनं संस्करणं मङ्गोलिया-देशस्य उलानबातर-नगरे आयोजितम् आसीत्। अस्मिन् अभ्यासे भारतीय-सेनायाः मङ्गोलिया-सशस्त्र-बलस्य च पञ्चचत्वारिंशत्-पञ्चचत्वारिंशत् (४५-४५) सैनिकाः भागं गृह्णन्ति।रक्षा-मन्त्रालयस्य कथनानुसारम् अस्य युद्धाभ्यासस्य मुख्यम् उद्देश्यं संयुक्तराष्ट्र-सङ्घस्य आदेशानुसारेण (जनादेशेन) अर्ध-नगरीय-पार्वत्य-क्षेत्रेषु आतङ्कवाद-विरोधि-अभियानानां सञ्चालनाय उभयोः पक्षयोः संयुक्त-सैन्य-सामर्थ्यस्य संवर्धनं वर्तते। प्रशिक्षण-पाठ्यक्रमे वेष्टन-अन्वेषण-अभियानं (घेराबन्दी तथा तलाशी), प्रकोष्ठ-प्रवेशाभ्यासः (कक्ष-घुसपैठः), विशिष्ट-हेलिकॉप्टर-सञ्चालनम्, जाल-सुरक्षा-प्रशिक्षणं (साइबर-सुरक्षा), द्रोण-तथा-द्रोण-विरोधि-यन्त्राणां प्रयोगः इत्यादयः कार्यकलापाः सम्मिलिताः सन्ति।एते अभ्यासाः उभयोः सेनयोः सैनिकानां कृते वास्तविक-रणनीतिक-परिदृश्येषु सहैव प्रशिक्षणं प्राप्तुं, संयुक्त-रूपेण कार्य-सम्पादन-क्षमतां दृढीकर्तुं च उत्तमम् अवसरं प्रददति।

# मुख्यमन्त्रिणः सुक्खू-महोदयस्य बृहत्- वक्तव्यम्- 'शीघ्रमेव भविष्यति मन्त्रिमण्डलस्य विस्तारः, मन्त्रिणां विभागाः अपि परिवर्तिष्यन्ते'



हिमसंस्कृतवार्ताः- शिमला।मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः अवदत् यत् राज्यमन्त्रिमण्डलस्य विस्तारः शीघ्रमेव सम्भविष्यति। अनेन सहैव मन्त्रिणां कार्य-विभागेषु अपि परिवर्तनं विधास्यते। सोमवासरे राज्यसचिवालये मुख्यमन्त्रिणः नूतन-कार्यालयस्य उद्घाटनानन्तरं वार्ताहरैः (पत्रकारैः) सह सम्भाषणकाले मुख्यमन्त्रिणा इयं घोषणा कृता। नूतन-कार्यालय-सम्बन्धे सः अवदत् यत् इदं भवनं कस्यापि वैयक्तिकं कार्यालयं नास्ति। पञ्चदश-विंशतिवर्षेभ्यः (१५-२० वर्ष) परं यदा विपक्षस्य कोऽपि नेता मुख्यमन्त्री भविष्यति, तदा अयमेव कार्यालयः तस्यापि उपयोगाय आगमिष्यति; इदं न तु तस्य स्वकीयगृहम्। सः निर्धारितसमये निर्माणकार्यं सम्पूरयितुम् अधिकारिभ्यः, कर्मचारिभ्यः, श्रमिकाणां च कृते कृतज्ञतां न्यवेदयत्।

### विपक्षस्य पार्श्वे वक्तुं नास्ति किमपि- मुख्यमन्त्री

विपक्षं लक्ष्यीकृत्य मुख्यमन्त्रिणा आक्षिप्तं यत् तस्य पार्श्वे वक्तुं किमपि सारभूतं नास्ति। सः आरोपम् अकरोत् यत् पूर्वतन-भाजपा-सर्वकारेण विना विचारं प्रायः एक-सहस्र-कोटि-रूप्यकाणां (१००० कोटि) भवनानि निर्मितानि, येषु बहूनि अद्यापि रिक्तानि वर्तन्ते। मुख्यमन्त्रिणा उल्लिखितं यत् २०१७ तः २०२२ पर्यन्तं जयरामठाकुर-सर्वकारस्य काले 'आरडीजी' रूपेण भाजपा-सर्वकाराय ६० सहस्र-कोटि-रूप्यकाणि अधिकानि प्राप्तानि आसन्। सः प्रश्नम् उत्थापितवान् यत् षष्ठ-वेतन-आयोगस्य संस्तुतीः प्रवर्त्य कर्मचारिणां दशसहस्र-कोटि-रूप्यकाणां (१०,००० कोटि) अवशिष्टांशं किमर्थं न प्रदत्तम्?

### किशाऊ-जलबन्ध-परियोजनायां प्रधानमन्त्रिणः नासीत् कोऽपि हस्तक्षेपः

किशाऊ- बहुउद्देश्यीय- जलबन्ध- परियोजनायाः विषये भाषमाणः मुख्यमन्त्री स्पष्टीकृतवान् यत् अस्मिन् विषये प्रधानमन्त्रिणः नरेन्द्रमोदिनः कोऽपि हस्तक्षेपः नासीत्। इदं केवलं राज्यानाम् अधिकारिणां मन्त्रिमण्डलसदस्यानां च उपवेशनस्य विषयः आसीत्।सः प्रत्यपादयत् यत् जयराम-ठाकुर-सर्वकारस्य काले विहितं पूर्व-प्रस्तावं वर्तमान-सर्वकारेण अङ्गीकर्तुं स्पष्टम् अस्वीकृतम्। मन्त्रिमण्डलस्य सदस्यैः एकस्वरेण निश्चितं यत् हिमाचलस्य प्राकृतिकसम्पदा लुण्ठयितुं न दास्यते। गृहमन्त्रिणः अमितशाह-महोदयस्य समक्षम् अपि हिमाचलस्य पक्षः दृढतया उपस्थापितः। यदि प्रदेशे जयरामठाकुरस्य सर्वकारः अभविष्यत्, तर्हि यथा उत्तराखण्ड-राज्येन सह सञ्जातं, तथैव अनुचितः अनुबन्धः हिमाचलेनापि सह अभविष्यत्।

# शिमला-आरक्षिविभागेन ग्रहीता मादकद्रव्य- तस्कराणां ४.१३ कोटि-रूप्यकाणां सम्पत्तिः; आर्थिकजाले कठोरः प्रहारः



हिमसंस्कृतवार्ताः- शिमला।

मादक-द्रव्यतस्करतां विरुद्ध्य शिमला- आरक्षि-विभागेन स्व-कार्यविधिः केवलं मादक-पदार्थानां ग्रहणकरणे तस्कराणां च ग्रहणे सीमितं न स्थापिता। आरक्षि-प्रशासनेन मादक-द्रव्य-व्यापारे संलग्नानां जनानाम् आर्थिक-गतिविधीनां गभीरम् अन्वेषणं कुर्वद्भिः तेषां सम्पत्तयः अपि लक्ष्यीकृताः। अस्मिन्नेव क्रमे आरक्षिपक्षतः 'एनडीपीएस' प्रकरणे अभियुक्तेभ्यः तेषां सहयोगिभ्यश्च सम्बद्धा प्रायः ४.१३ कोटिरूप्यकाणां (चतुःकोटि- त्रयोदश-लक्ष-रूप्यकाणां) चल-अचल- सम्पत्तिः विधिपूर्वकम् अधिहृता। आरक्षि-विभागानुसारम् एताः विपुलाः सम्पदः मादक-द्रव्याणाम् अवैधव्यापारेण आर्जितेन धनेनैव अर्जिताः आसन्।

इयं कार्यविधिः सदर-आरक्षि-स्थानके पञ्जीकृतस्य १०७-सङ्ख्याकस्य अभियोगस्य सम्बन्धे विहिता, यः अभियोगः १४ अगस्त २०२४ दिनाङ्के एनडीपीएस- अधिनियमस्य २१ तथा २९ इति धारयोः अन्तर्गतं पञ्जीकृतः आसीत्। विदितं स्यात् यत् १३ अगस्त २०२४ दिनाङ्के शिमलायाः पुरातन-बसस्थानके स्थिते एकस्मिन् विश्रामगृहे कृतायां कार्यविधौ सत्यां बिहारस्य लखीसराय- निवासिनः (साम्प्रतं दक्षिण-देहल्यां स्थितस्य) सूरज नामकस्य, आरा-निवासिनः रोहितपाण्डेय-नामकस्य हस्ताभ्यां ६.५ ग्राम-परिमितः 'चिट्टा' मादकपदार्थः प्राप्तः आसीत्। ततः परं 'पृष्ठगामि-अग्रगामि-सम्पर्काणाम्' अन्वेषणे सति अन्ये बहवः अभियुक्ताः अपि कारागारे निक्षिप्ताः।

**१९ जनानां नाम्ना विंशतिः (२०) सम्पदः चिह्निताः**

वर्षे २०२६ शिमला-आरक्षिविभागेन अस्मिन् प्रकरणे वित्तीय-अन्वेषणं प्रारब्धम्। अन्वेषणे नव (९) अभियुक्तानां दश (१०) सहकारिणां च आहत्य १९ जनानां नाम्ना सम्पदः अभिज्ञाताः। एतासु सम्पत्तिषु द्वौ आवासीयभूखण्डौ, द्वे आवासीयभवने, एकम् उपगृहम्, एकं 'होम-स्टे' अतिथिशाला च समाविष्टाः सन्ति। एतदतिरिच्य महिन्द्रा-थार, ह्युंडे-क्रेटा, मारुति-सुजुकी ग्रैण्ड-विटारा, टाटा नेक्सन् प्रभृतीनि विविधानि अलङ्कृतानि वाहनानि अपि अन्वेषणपरिधौ आगतानि। एतासां विंशति-सम्पत्तीनाम् अनुमानितं मूल्यं प्रायः ४.१३ कोटि-रूप्यकाणि अस्ति।

**२०२६ तमे वर्षे अद्यावधि १२.५२ कोटि-रूप्यकाणां सम्पदः अधिहृताः- एसएसपी गौरवसिंहः**

आरक्षि-वरिष्ठ-अधीक्षकेन गौरवसिंह-महोदयेन ज्ञापितं यत् २०२६ तमे वर्षे साम्प्रतं यावत् पञ्चदशसु (१५) एनडीपीएस-प्रकरणेषु अष्टषष्टि-अभियुक्तानां (६८) सहचराणां च १२.५२ कोटि-रूप्यकेभ्यः अधिकाः सम्पदः अधिहृताः सन्ति। एतासु आवासीय-व्यावसायिक-भूमयः, आपणानि, वाहनानि, वित्तकोषे निक्षिप्त-धनानि, नकदराशिः, सुवर्ण-आभूषणानि च अन्तर्भवन्ति।

तेन स्पष्टीकृतं यत् नशा-विरोधि-रणनीतौ अयम् एकः मूलभूतः परिवर्तनकारी च निर्णयः अस्ति। पूर्वं केवलं पदार्थानां ग्रहणकरणे बलं दीयते स्म; अधुना तु आपूर्तेः जालेन सहैव तस्कराणां मूल-आर्थिकस्रोतांसि छिन्दीकर्तुं कार्यं क्रियते, येन तेषाम् आर्थिकः आधारः एव विनश्येत्।

**आयस्य वैध-स्रोतांसि न प्राप्तानि**

वित्तीय-परीक्षणे प्रत्यक्षम् आगतं यत् अभियुक्तानां तेषां सहचराणां च पार्श्वे एतावत्याः विपुलायाः सम्पत्तेः अर्जनाय कोऽपि अधिकृतः वैधश्च आयस्रोतः नासीत्। अत एव प्रलेखानां वित्तीय-आकलनानन्तरम् एनडीपीएस-अधिनियमस्य प्रावधानानाम् अन्तर्गतम् एताः सर्वाः सम्पदः सर्वकार-पक्षतः अधिहृताः कृताः।

**बर्रा-क्षेत्रे २० अक्तूबर-दिने शस्त्रपूजनम्**

कानपुरे सनातन-सेवा-सत्सङ्गसमितिः इत्यस्य सभा प्रो. इन्द्रमोहन-रोहत्गी-महोदयस्य अध्यक्षतायां सम्पन्ना। सभायां संस्थायाः आगामी- कार्यक्रमाणां चर्चा अभवत्।

संस्थापकः राष्ट्रियाध्यक्षश्च आचार्यः सुधीरभाईमिश्रः अवदत् यत् सनातनधर्मे शस्त्राणामपि महत्त्वपूर्णं स्थानम् अस्ति। अतः दशहरा-दिने हिन्दुपरिवारेषु शस्त्रपूजनस्य परम्परा भवेत् इति सः आह्वानं कृतवान्। प्रतिवर्षमिव २० अक्तूबर-दिने प्रातः ११ वादने बर्रा- ५ स्थिते महाकालेश्वर-मन्दिरे वैदिकाचार्यैः शस्त्रपूजनं विधिपूर्वकं भविष्यति।

१५ नवम्बरदिने संस्थायाः पञ्चदशतमः स्थापनादिवसः दीपावली-मिलन-समारोहश्च लक्ष्मीनारायणमन्दिरे आयोजयिष्यते। सभायां अनेके पदाधिकारिणः सदस्याश्च उपस्थिताः आसन्।

# 'नौतोड-भूम्यै निर्धारणीयं मानदण्डम्; केवलम् उपयुक्तेभ्यः आवश्यकतावद्भ्यश्च दीयेत भूमिः- राज्यपालः कवीन्द्रगुप्ता



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशस्य राज्यपालः कवीन्द्रगुप्तमहोदयः अवदत् यत् राज्यस्य जन-जातीय-क्षेत्रेषु 'नौतोड' भूमेः आबंटनाय समीचीनः समानश्च मानदण्डः निर्धारितः भवेत्। नौतोड-भूमिः केवलं पात्राणां दीनानाम् आवश्यकतावतां च कृते एव देया। सः प्रोक्तवान् यत् पूर्वमपि अस्मिन् सन्दर्भे परीक्षणप्रक्रिया प्रवृत्ता आसीत्; साम्प्रतं सोऽपि अवलोकयति यत् अस्मिन् विषये का समुचिता व्यवस्था सम्भवेत्। एतदर्थं विधिक-प्रावधानानाम् अपि गम्भीरं परीक्षणं विधास्यते। किन्नौरमण्डले नौतोड-विषये प्रचलन्तम् आन्दोलनं लक्ष्यीकृत्य राज्यपालेन प्रतिपादितं यत् एतादृश्यः प्रतिक्रियाः समायान्ति एव; सः सम्पूर्ण-प्रकरणस्य गुणदोषान् अवलोकयति। राजस्वमन्त्री जगतसिंहनेगीमहोदयः अपि तेन सह मेलनं कृत्वा इमं विषयं तस्य समक्षम् उपस्थापितवान्। सोमवासरे 'लोकभवनशिमलायां' वार्ताहरैः सह अनौपचारिकवार्तालापकाले कृषि-उद्यान- विश्वविद्यालयेषु कुलपतीनां नियुक्तीनां प्रश्ने राज्यपालेन स्पष्टीकृतं यत् अस्याः प्रक्रिया प्रारब्धा वर्तते। वर्षर्तु-सत्रे पारितस्य सम्बद्ध-विधेयकस्य विषये सः अवदत् यत् अद्यावधि तत् प्रकरणं तस्य समक्षं न समागतम्।

## विश्वविद्यालयेभ्यः स्वकीय-आय-वृद्धये प्रयासाः करणीयाः- राज्यपालः

राज्यपालेन प्रतिपादितं यत् विश्वविद्यालयेभ्यः स्वावलम्बनाय स्वकीय-राजस्ववृद्धये अपि उपायाः करणीयाः, येन ते स्व-पादयोः स्थातुं समर्थाः भवेयुः। एतदर्थं सार्वजनिक-निजी-सहभागत्वस्य माध्यमेन सम्भावनानाम् अन्वेषणं विधातुं विचारः क्रियते।
हिमाचलराज्ये मादकद्रव्याणां प्रसारं वीक्ष्य गम्भीरां चिन्तां प्रकटयन् राज्यपालेन प्रतिपादितं यत् सीमाक्षेत्रेषु निरीक्षणं संवर्धनीयम्, यतो हि बाह्यक्षेत्रेभ्यः मादकपदार्थाः समायान्ति। प्रमुख-तस्कराणां निग्रहणम् अतीव आवश्यकम् अस्ति। आरक्षि-कार्यवाविधिषु प्रायशः मादकद्रव्य-सेवकाः एव अधिकसङ्ख्यया गृह्यन्ते; किन्तु अस्य आपूर्तेः पृष्ठे स्थितानां बृहत्-तस्कराणां बन्धनं परमावश्यकम्। सः अवदत् यत् सर्वाधिकं महत् आह्वानं तासां अशीति-प्रतिशतं (८०%) युवानां रक्षणम् अस्ति, ये अद्यापि अस्मात् जालात् मुक्ताः सन्ति। निवारण-प्रक्रियासु जन-जागरूकतायाश्च उपरि विशेषध्यानं दातव्यम्।

### पर्यटन-क्षेत्रस्य विस्ताराय महती आवश्यकता

राज्यपालः अवदत् यत् हिमाचले पर्यटनक्षेत्राय अधिकः विस्तारः प्रदेयः। राज्ये यातायातसंयोजकता दृढीकरणीया, विमान-सेवाश्च अपि उन्नताः विधातव्याः। तादृशानां पर्यटनस्थलानाम् अभिज्ञानं करणीयम्, यत्र साम्प्रतं पर्यटकाः न प्राप्नुवन्ति। तेन हिमाचले धार्मिकपर्यटनस्य विकासाय अपि बलं दत्तम्। 'माता-वैष्णोदेवी' तीर्थस्य उदाहरणं दत्त्वा सः प्रोक्तवान् यत् कटरानगरे यथा धार्मिकपर्यटनं विकसितं, तेन स्थानीय-स्तरे स्वजीविकायाः साधनानि प्रवृद्धानि जनाश्च उत्तम- जीविका-अवसरान् लब्धवन्तः। हिमाचलेऽपि धार्मिकपर्यटनस्य विपुलसम्भावनाः सन्ति। सः पर्यटनम् 'उद्योग' श्रेण्यां स्थापयितुं सहमतिं प्राकटयत्।

## सर्वकारीय-चिकित्सकानां निजीचिकित्सा-कार्यस्य निषेधः प्रशंसनीयः

जम्मूकश्मीर-लद्दाख-क्षेत्रयोः स्वकीयम् अनुभवम् उल्लिखन् राज्यपालः अवदत् यत् हिमाचले सर्वकारीय-चिकित्सकैः निजी-चिकित्सा-कार्यस्य अनिर्वाहनं प्रशंसनीयम् अस्ति। सः अवदत् यत् बहुषु स्थानेषु सर्वकारीयसेवानन्तरं वैद्याः निजी-चिकित्सायां संलग्नाः भवन्ति, येन सर्वकारीयसंस्थासु तेषां पूर्णम् अवधानं न भवति, सामान्यजनेभ्यश्च उत्तमानां सुलभानां च स्वास्थ्य-सुविधानां प्रदाने काठिन्यम् उत्पद्यते।

## केन्द्रीयमन्त्रिणां पुरतः उत्थाप्यन्ते प्रदेशस्य विषयाः

राज्यपालेन उल्लिखितं यत् हिमाचलेन सम्बद्धाः महत्त्वपूर्णाः विषयाः तेन स्वयं केन्द्रीय-मन्त्रिणां समक्षम् उत्थाप्यन्ते। एतदर्थं विविध-हितधारकेभ्यः प्रतिपुष्टिः अपि सङ्गृह्यते। सः दृढीकृतवान् यत् राज्यस्य प्रासङ्गिकविषयान् उचितमञ्चेषु स्थापयितुं सः निरन्तरं प्रयत्नशीलः वर्तते।



# अनन्तचतुर्दश्यां श्रद्धालूनां कृते विशेषव्यवस्था

हिमसंस्कृतवार्ताः- कुणालकौशिकः मोतिहारी।
***सोमेश्वर- उच्चविद्यालये प्रथमवारं विशालः जर्मन-हैङ्गरः स्थापितः***
अनन्तचतुर्दश्याः अवसरे अरेराजस्थे प्रसिद्धे बाबा सोमेश्वरनाथमन्दिरे जलाभिषेकं कर्तुं आगच्छतां श्रद्धालूनां सुविधायै जिलाप्रशासनेन विशेषव्यवस्थाः क्रियन्ते। श्रद्धालूनां विश्रामस्य अन्येषां च सुविधानां कृते सोमेश्वर-उच्चविद्यालयस्य प्राङ्गणे प्रथमवारं विशालः जर्मन हैङ्गरः स्थापितः अस्ति। जिलाधिकारी पुलिस- अधीक्षकेण सह मन्दिरपरिसरस्य सोमेश्वर-उच्चविद्यालयस्य च निरीक्षणं कृतवान्। श्रद्धालूनां कृते समुचितस्थानस्य, शुद्धपेयजलस्य व्यवस्था, अस्थायिशौचालयानां निर्माणमपि करिष्यते। मन्दिरपरिसरे जनसमूहस्य नियन्त्रणाय अवरोधकव्यवस्था सुदृढा करिष्यते। श्रद्धालूनां सुरक्षितनिर्गमनाय द्वे निर्गमद्वारे निर्मास्येते। सम्पूर्णपरिसरे पर्याप्तप्रकाशस्य व्यवस्था भविष्यति। विद्युत्प्रवाहे बाधा उत्पन्ने सति जनरेटर-यन्त्राणि अपि सज्जानि स्थापयिष्यन्ते। जिलाधिकारी स्पष्टं कृतवान् यत् जलाभिषेकस्य समये सर्वेषां श्रद्धालूनां कृते समानव्यवस्था भविष्यति। कस्यापि प्रकारस्य विशिष्टव्यक्तिव्यवस्था न भविष्यति। सुरक्षायै पर्याप्तसंख्यायां पुलिसबलस्य नियुक्तिः करिष्यते। दण्डाधिकारिणः पुलिस-अधिकारिणः च सर्वत्र सतर्कतया निरीक्षणं करिष्यन्ति। असामाजिक-तत्त्वानां विषये विशेषदृष्टिः भविष्यति, तेषां प्रवेशं निवारयितुं च आवश्यकाः उपायाः क्रियन्ते। अनुमण्डलाधिकारी अवदत् यत् मन्दिरपरिसरे जलाभिषेकमार्गे च श्रद्धालूनां सुविधायै सर्वाः आवश्यकाः व्यवस्थाः निर्धारितसमयात् पूर्वमेव पूर्णाः करिष्यन्ते।



# बर्रा-क्षेत्रे २० अक्टोबर्-दिने शस्त्रपूजनम्

कानपुरे सनातन-सेवा-सत्सङ्गसमितिः इत्यस्य सभा प्रो. इन्द्रमोहन-रोहतगी-महोदयस्य अध्यक्षतायां सम्पन्ना। सभायां संस्थायाः आगामी-कार्यक्रमाणां चर्चा अभवत्।संस्थापकः राष्ट्रियाध्यक्षश्च आचार्यः सुधीरभाई-मिश्रः अवदत् यत् सनातनधर्मे शस्त्राणामपि महत्त्वपूर्णं स्थानम् अस्ति। अतः दशहरा-दिने हिन्दुपरिवारेषु शस्त्रपूजनस्य परम्परा भवेत् इति सः आह्वानं कृतवान्। प्रतिवर्षमिव २० अक्टोबर्-दिने प्रातः ११ वादने बर्रा-५-स्थिते महाकालेश्वर-मन्दिरे वैदिकाचार्यैः शस्त्रपूजनं विधिपूर्वकं भविष्यति। तथा १५ नवम्बर्-दिने संस्थायाः पञ्चदशतमः स्थापना-दिवसः दीपावली-मिलन-समारोहश्च लक्ष्मीनारायण-मन्दिरे आयोजयिष्यते। सभायां अनेकाः पदाधिकारिणः सदस्याश्च उपस्थिताः आसन्।

# ‘बिहारभवन- उपविधिः- २०२६’ सरलां जनोपयोगिनीं च विधातुं मन्त्रिसमूहस्य उपवेशनं सम्पन्नम्

## बिहार-भवन-उपविधौ सारल्ये पारदर्शकतायां च बलो दत्तः



**हिमसंस्कृतवार्ताः- राघवनाथ झा, पाटलिपुत्रम्**
माननीयोपमुख्यमन्त्रिणः विजयकुमार-चौधरीमहोदयस्य अध्यक्षतायां सिंचाई- भवनस्थे कार्यालये नगरविकास- आवासविभाग-सम्बद्धायाः ‘बिहार- भवन- उपविधिः- २०२६’ इत्याख्यायाः प्रारूपाधारेण गठितस्य उच्चस्तरीय-मन्त्रिसमूहस्य उपवेशनम् आयोजितम् अभवत्। अस्मिन् उपवेशने प्रस्तावितभवनोपविधेः विभिन्नानां प्रावधानानां विस्तरेण विचारविमर्शः जातः। सहैव भवननिर्माणसम्बद्धानां नियामकप्रक्रियाणां सरलीकरणाय, पारदर्शकतायै, सौकर्याय, जनोपयोगाय च विभिन्नानां परामर्शानां संस्तुतीनां च चर्चा कृता। अस्मिन् उपवेशने सूचना-जनसम्पर्कविभागस्य ग्रामीणविकासविभागस्य च माननीयमन्त्री श्रवणकुमारः, सहकारिताविभागस्य माननीयमन्त्री रामकृपालयादवः, नगरविकास-आवासविभागस्य माननीयमन्त्री नीतीशमिश्रः, लोकस्वास्थ्याभियन्त्रणविभागस्य माननीयमन्त्री सञ्जयकुमारसिंहः च उपस्थिताः आसन्।
उपवेशनकाले नगरविकास-आवासविभागस्य प्रधानसचिवेन विनयकुमारेण सङ्गणकीयप्रस्तुत्या ‘बिहार-भवन-उपविधिः-२०२६’ इत्यस्य प्रारूपस्य प्रस्तावितानां प्रावधानानां च विस्तृता सूचना प्रदत्ता। माननीयोपमुख्यमन्त्री विजयकुमारचौधरी अवदत् यत् मानचित्रस्य प्रामाणिकतासम्बन्धिषु प्रावधानेषु प्रस्तावितसंशोधनेन सामान्यजनैः महती सुविधा प्राप्स्यते। सः अकथयत् यत् विविधहितधारकैः प्रदत्ताः सकारात्मक-व्यावहारिकपरामर्शाः ‘बिहार-भवन-उपविधिः-२०२६’ इत्येतं नियमं प्रभावशालिनं, सरलं, जनोपयोगिनं च विधातुं महत्त्वपूर्णां भूमिकां निर्वक्ष्यन्ति। नीतीशमिश्रेण उक्तम् यत्- "बिहार-भवन- उपविधेः-२०२६ मुख्यं लक्ष्यं व्यापारसौकर्यं जीवनयापनसौकर्यं च संवर्धयितुम् अस्ति। एतेन साकं भवननिर्माणप्रक्रियाः सुगमाः कर्तव्याः, जनेभ्यः च उत्तमाः सुविधाः प्रदातव्याः। अस्याः उपविधेः अन्तर्गतम् अनावश्यकाः नियमाः प्रक्रियाश्च न्यूनीकरिष्यन्ते, तथा च भवननिर्माणस्य अनुमतिप्रक्रियाः सरलाः, पारदर्शिन्यः, प्रभावशालिन्यश्च विधास्यन्ते।" सः पुनरवदत् यत् माननीयमुख्यमन्त्रिणः सम्राट चौधरीमहोदयस्य सुनियोजितस्य, पारदर्शिनः, नागरिककेन्द्रितस्य च विकासदृष्टिकोणस्यानुरूपं ‘बिहार- भवन-उपविधिः- २०२६’ इत्याख्यस्य माध्यमेन भवननिर्माणप्रक्रियाः सरलाः, सुगमाः, पारदर्शिन्यश्च क्रियन्ते, येन सामान्यनागरिकेभ्यः श्रेष्ठाः सुविधाः प्राप्येरन्।
मन्त्रिणा सूचितं यत् उपवेशने ‘बिहार- भवन-उपविधिः-२०२६’ इत्येतं समयानुकूलं, पारदर्शिनं, नागरिककेन्द्रितं च कर्तुं तथा च निर्माणप्रक्रियाः सुगमाः विधातुं सम्बद्धेषु विविधपक्षेष्वपि मन्थनं कृतम्। अस्मिन् अवसरे नगरविकास-आवासविभागस्य वरिष्ठाधिकारिणः अन्ये च सम्बद्धाधिकारिणः उपस्थिताः आसन्।

# बिहारराज्यस्य आदर्शविद्यालयेषु पदाधिकारिणः पाठयिष्यन्ति

**पाटलिपुत्रम्,21/09/2026**
**हिमसंस्कृतवार्ताः- डॉ विमलेश झा**
बिहारराज्यस्य ७०० आदर्शविद्यालयेषु प्रशासनिकाः पदाधिकारिणः छात्रान् पाठयिष्यन्ति। मण्डलस्तरे नियुक्ताःमण्डलाधिकारी , अपर-मण्डलाधिकारी, अनुमण्डलाधिकारी , प्रखण्डविकासपदाधिकारी , जिलाशिक्षापदाधिकारी तथा प्रखण्डशिक्षा-पदाधिकारी आदर्शविद्यालयेषु अध्यापनकार्ये सहभागितां करिष्यन्ति। इच्छुकाः आरक्षी-अधीक्षकाः , सहायकआरक्षीअधीक्षकाः तथा आरक्षीउपाधीक्षकाः अपि छात्रान् पाठयितुं शक्नुवन्ति। अस्य उपक्रमस्य मुख्योद्देश्यं छात्रैः सह प्रशासनिकाधिकारिणां प्रत्यक्षसंवादं स्थापयितुं, छात्रान् उच्चतराध्ययनाय प्रेरयितुं तथा तेषां समस्याः समीचीनतया ज्ञातुम् अस्ति। पदाधिकारिणः छात्राणां शैक्षिकविकासं, अनुशासनं, नियमितोपस्थितिं च समीक्षिष्यन्ति।
अस्मिन् सम्बन्धे शिक्षाविभागस्य सचिवेन श्रीराजीवरोशनः सर्वेषां जनपदानां जिलाधिकारिभ्यः निर्देशः प्रदत्तः यत् आदर्शविद्यालयेषु एकैकः अधिकारी सम्बद्धः करणीयः। अनेन माध्यमेन शिक्षाविभागं ज्ञातुं शक्नोति यत् केषु आदर्शविद्यालयेषु कस्य स्तरस्य पदाधिकारिणः अध्यापनकार्यं करिष्यन्ति। पदाधिकारिणः प्रतिमासं चतुरः दिवसान्, अर्थात् सप्ताहे एकं दिनम्, आदर्शविद्यालयेषु अध्यापनं करिष्यन्ति।पदाधिकारिणः स्वस्य रुच्यनुसारं विषयस्य चयनं कृत्वा एकस्य वा ततोऽधिकानां वर्गाणां पाठनं कर्तुं शक्नुवन्ति। ते छात्राणां पाठ्यपुस्तकस्य, गृहकार्यस्य तथा कक्षायां प्रचलितस्य अध्यापनप्रक्रियायाः अवलोकनमपि करिष्यन्ति। छात्राणां शैक्षिकप्रगतेः, अनुशासनस्य तथा नियमितोपस्थितेः विषये अपि ते समीक्षा करिष्यन्ति। अध्यापनकार्येण सह विद्यालयस्य आधारभूतसुविधानामपि निरीक्षणं भविष्यति। विद्युत्-व्यवस्था, स्वच्छता, शौचालयाः, पेयजलव्यवस्था, विद्यालयपरिसरः तथा अन्याः आवश्यकसुविधाः अस्य निरीक्षणस्य अन्तर्गताः भविष्यन्ति। पदाधिकारिणः आदर्शविद्यालयेषु आगमनसमये प्रधानाचार्यैः शिक्षकैश्च सह उपवेशनं कृत्वा विद्यालयस्य सर्वाङ्गीणविकाससम्बद्धेषु आवश्यकेषु विषयेषु विचारविमर्शं करिष्यन्ति। विद्यालयेषु नवाचारस्य प्रोत्साहनाय अपि विशेषं ध्यानं प्रदास्यते।आदर्शविद्यालयेषु अध्यापनसमये आङ्ग्लभाषायाः विशेषाध्ययनं भविष्यति। अन्येषां विषयाणाम् अध्यापनकालेऽपि यथासम्भवं आङ्ग्लभाषायाः शब्दानां प्रयोगं कृत्वा छात्राणां भाषाज्ञानं वर्धयितुं प्रयत्नः करिष्यते। एतदतिरिक्तं पदाधिकारिणः वादविवादे, लेखने तथा व्याकरणे विशेषं ध्यानं दास्यन्ति। अनेन छात्रेषु अभिव्यक्तिक्षमता, तर्कशक्ति तथा लेखनकौशलं विकसितं भविष्यति।
आदर्शविद्यालयेषु अध्यापनकार्यं कुर्वन्तः पदाधिकारिणः विद्यालयस्य स्थितेः, स्वीयानां शैक्षिकगतिविधीनां तथा छात्राणां प्रगतेः विस्तृतं प्रतिवेदनं शिक्षाविभागाय प्रेषयिष्यन्ति। ततः जिलाशिक्षापदाधिकारी एतत् प्रतिवेदनं राज्यस्तरीयसमीक्षासभायां प्रस्तोष्यन्ति।
अस्य उपक्रमस्य माध्यमेन प्रशासनिकपदाधिकारिणां विद्यालयैः सह प्रत्यक्षसम्बन्धः सुदृढः भविष्यति तथा छात्राणां शैक्षिकविकासे, अनुशासने, नियमितोपस्थितौ च सकारात्मकः प्रभावः अपेक्षितः अस्ति।





# आदरणीयस्य राज्यसभासांसदस्य मानसिंहजी परमारस्य प्रेरक-उपस्थित्यां 'जय सोमनाथ' इति

## शिक्षकमण्डल्याः एकादशी वार्षिकी साधारणसभा आयोजिता

हिमसंस्कृतवार्ताः- जगदीश डाभी (सोमनाथः, गुजरातम्)

प्राप्तवार्तानुसारं गुजरातप्रान्तस्य गीर सोमनाथजनपदस्य वेरावल- उपमण्डलस्य प्राथमिकशिक्षकाणां मुख्यशिक्षकाणां च सहकारिसंस्थायाः 'जय सोमनाथ वेरावल तालुका प्राथमिकशिक्षकः/ मुख्यशिक्षकः धिराणे एवं ग्राहक- सहकारीमण्डली- सीमित, वेरावलम्' इत्यस्याः एकादशी वार्षिकी साधारणसभा २०२६ तमस्य वर्षस्य सितम्बरमासस्य १९ तमे दिनाङ्के 'होटल सागर दर्शन', सोमनाथ इत्यत्र महता उत्साहेन गौरवान्वितेन च वातावरणेन समायोजिता।

एषा साधारणसभा माननीयस्य राज्यसभासांसदस्य मानसिंहजी परमारस्य अध्यक्षत्वे तस्य प्रेरिकायां गरिमामय्यां च उपस्थितौ सम्पन्ना। तेन सह जिला-शिक्षा-समित्याः (गीर सोमनाथः) अध्यक्षः मसरीभाई राठौड़ः, मण्डल- प्राथमिक-शिक्षाधिकारी अशोकभाई पटेलः, उपमण्डल-प्राथमिक- शिक्षाधिकारी निलेषभाई अपारनाथी मुख्यातिथिरूपेण उपस्थिताः आसन्। विशेष-अतिथिरूपेण सोमनाथ-न्यासाधिकारिणा (प्रबन्धकेन) विजयसिंहचावडा-महोदयेन, वेरावल- उपमण्डलस्य भारतीयजनतापार्टी-अध्यक्षेण प्रद्युम्नसिंहडोडीयामहोदयेन, कीडीवाव-शैक्षणिक- सङ्कुलस्य, गीर-सोमनाथ-मण्डलस्य HTAT- शैक्षिकसङ्घस्य अध्यक्षेण अशोकसिंहचावडामहोदयेन च उपस्थाय कार्यक्रमस्य शोभा प्रवर्धिता।

कार्यक्रमस्य प्रारम्भः मञ्चस्थैः महानुभावैः दीपप्रज्वालनेन कृतः। उपस्थितानां सर्वेषां महानुभावानां पुष्पगुच्छैः पुस्तकसमर्पणेन च भावपूर्णं स्वागतमक्रियत। संस्थायाः कार्यकारिणीसदस्येन विजयसिंहडोडीया-महोदयेन शाब्दिकं स्वागतं विहितम्। अस्मिन् अवसरे संस्थायाः कार्यकारिणीसदस्यैः गुजरात- भारतीय-जनता- पार्टी- दलस्य 'बक्षी पञ्च' प्रदेशाध्यक्षस्य, माननीयस्य राज्यसभासांसदस्य मानसिंहजी परमारस्य विशेषं सम्माननं कृतम्। सः संस्थायाः स्थापनाकालात् आरभ्य अद्यावधि एकादशवर्षाणां यात्रायाः साक्षीरूपेण संस्थायाः कार्याणि विविधानि संस्मरणानि च अस्मरत्। संस्थया सहकारिक्षेत्रे कृतां प्रगतिं दृष्ट्वा सः सर्वान् अभिनन्दितवान्, संस्थायाः उत्तरोत्तरप्रगतये उज्ज्वलभविष्ये च शुभाशयान् प्राकटयत्। सः स्वकीये प्रेरणादायिनि सम्बोधने राष्ट्रसेवायां शिक्षकाणां भूमिकां योगदानं च अधिकृत्य मार्गदर्शनं कुर्वन् अकथयत् यत् शिक्षकाः समाजस्य निर्माणे राष्ट्रनिर्माणेषु च महती जिम्मेदारीं निर्वहन्ति।

उपमण्डल- प्राथमिक- शिक्षाधिकारिणा निलेषभाई- अपारनाथी- महोदयेन, मण्डल-प्राथमिक- शिक्षाधिकारिणा अशोकभाईपटेल-महोदयेन च सहकारिप्रवृत्तीनां महत्त्वम्, सङ्घटनस्य शक्तिं, सहकारभावनाया च संस्थायाः प्रगतिः कथं साधयितुं शक्यते इति विषये सुन्दरं मार्गदर्शनं प्रदत्तम्। प्रबन्धकेन विजयसिंहचावडा-महोदयेन सोमनाथन्यासतः (ट्रस्ट) उपस्थितेभ्यः सर्वेभ्यः महानुभावेभ्यः सभासदेभ्यः च स्वागताः शुभाशयाः च व्याहृताः। मण्डल्याः अध्यक्षेण २०२५-२६ तमस्य वर्षस्य वार्षिकायव्ययस्य विवरणं प्रस्तुतं कृत्वा संस्थायाः पारदर्शितां प्रति प्रतिबद्धता प्रदर्शिता, सभासदानां विश्वासः च सुदृढः कृतः। समवायस्य मन्त्रिणा रामभाई-महोदयेन पञ्जीकरणस्य उत्तरदायित्वं निर्वूढम्। कार्यक्रमस्य सुन्दरं सञ्चालनं कानभाई झाला (काजली सीम विद्यालयः), रमेशभाई झणकात (खेराली प्राथमिक विद्यालयः) आभ्यां कृतम्। कार्यक्रमस्यान्ते आभारप्रदर्शनं सभासदेन भरतसिंहवाला-महोदयेन कृतम्। कार्यक्रमस्य समापने उपस्थिताः महानुभावाः, कार्यकारिणीसदस्याः, सर्वे सभासदाः च मिलित्वा सहभोजनम् (स्नेहभोजनम्) अकुर्वन्।अस्य सम्पूर्णस्य कार्यक्रमस्य साफल्याय स्मरणीयत्वाय च संस्थायाः सर्वैः कार्यकारिणीसदस्यैः उत्तमम् आयोजनं, समन्वयः, अथकपरिश्रमः च कृत्वा सङ्घकार्यस्य (टीमवर्क) श्रेष्ठमुदाहरणं प्रस्तुतम्। सर्वेषां सहकारेण समन्वयेन च एषा एकादशी वार्षिकी साधारणसभा सफलतापूर्वेण सम्पन्ना अभवत्। 'सहकारात् सङ्घटनम्, सङ्घटनात् च प्रगतिः' इति सन्देशेन सह आयोजिता एषा वार्षिकी साधारणसभा संस्थायाः एकादशवर्षाणां सफलां यात्राम् आगामिप्रगतये च नवीनाम् ऊर्जां प्रेरणां च प्रदत्तवती



# हिन्दी-पक्षोत्सवस्य उपलक्ष्ये भारती- साहित्य- परिषदः परिचर्चा-कविगोष्ठी च

हिमसंस्कृतवार्ताः- बोकारोनगरम्।

भारती-साहित्यपरिषदः, बोकारो इत्यस्य तत्त्वावधानेन रविवासरे सायंकाले सहकारी-उपनिवेशस्थिते निवासी- कल्याणसङ्घस्य कार्यालयसभागारे हिन्दी-दिवस- पक्षोत्सवस्य उपलक्ष्ये परिचर्चा-सह-कविगोष्ठी इति साहित्यिक-कार्यक्रमस्य आयोजनं कृतम्।

भारती-साहित्यपरिषदः मुख्यसंरक्षकस्य वरिष्ठसाहित्यकारस्य च श्रीसुखनन्दनसिंहस्य 'सदय' इत्यस्य अध्यक्षतायां सम्पन्नस्य कार्यक्रमस्य शुभारम्भः मुख्यातिथिना वरिष्ठसाहित्यकारया डॉ. आशापुष्पया, संस्थाध्यक्षेन डॉ. परमेश्वरभारती-महोदयेन, उपाध्यक्षेन डॉ. रामनारायणसिंहेन, महासचिवेन डॉ. मनोजकुमारसिंहेन, माध्यमप्रभारी-कविना अरुणपाठकेन च उपस्थितैः सर्वैः कविभिः कवयित्रीभिश्च भगवत्याः सरस्वत्याः चित्रे माल्यार्पणेन पुष्पार्चनेन च कृतः। कवयित्री ज्योति वर्मा सरस्वती-वन्दनां प्रस्तुतवती।

# उर्वरकोपलब्धता-कृषकपरिचय-पत्रविषये भ्रामकवार्ता मा प्रसारयन्तुः कृषिमन्त्री विजयकुमारसिंहः

## कृषकाणां हिताय पर्याप्तोर्वरकवितरणाय सर्वकारः कटिबद्धः; समस्यायां साहाय्यवाणीं (1800-180-1551) सम्पर्कयन्तु

हिमसंस्कृतवार्ताः राघव नाथ झा

राज्ये उर्वरकस्य उपलब्धतां वितरणव्यवस्थां च स्वीकृत्य कृषकेषु कोऽपि भ्रमः न भवेत् इति बिहारस्य कृषिमन्त्रिणा श्रीविजयकुमारसिंहेन स्पष्टीकृतम्। सः न्यवेदयत् यत् राज्यसर्वकारः कृषकेभ्यः तेषाम् आवश्यकतानुसारं मृदापरीक्षणाधारेण च पर्याप्तोर्वरकं प्रदातुं दृढसंकल्पः अस्ति। समग्रवितरणव्यवस्थायाः निरन्तरं सूक्ष्मनिरीक्षणं विधीयते। मन्त्रिणा उक्तं यत् कृषकपरिचयपत्रे (Farmer ID) भूक्षेत्राङ्कनविषये उर्वरकवितरणे वा यदि कापि बाधा उत्पद्यते, तर्हि कृषकाः अविलम्बं कृषिविभागस्य निःशुल्क-साहाय्यवाणी-सङ्ख्यायां 1800-180-1551 अथवा सम्बद्धेभ्यः विभागीयपदाधिकारिभ्यः सूचनां प्रयच्छन्तु। खुदरा-विक्रेतारोऽपि वितरणबाधायाः सूचनां मण्डलकृष्यधिकारिणे कृषिनिदेशकाय वा दातुं शक्नुवन्ति। सः स्पष्टमकरोत् यत् वितरणे पारदर्शकतायै संवृद्ध्ये च डिजिटल-व्यवस्था प्रवर्तिता। उर्वरकस्य अपविपणनं (कालाबाजारी), अनधिकृतसङ्ग्रहं चावरोद्धु प्रशासन-आरक्षिदलैः सह मिलित्वा निरन्तरम् अन्वेषणाभियानं प्रचलति।

# सांस्कृतिकपरिचयस्य आधारः भारतीय- ज्ञान- परम्परा- चन्द्रकान्तः

## ज्ञानपरम्परायाः प्रासङ्गिकतां बोधन्तु युवानः- प्रो. दिलीपझा
## संस्कृतविश्वविद्यालये 'प्रबुद्धभारतम्' इति स्मारिकायाः लोकार्पणम्



**हिमसंस्कृतवार्ताः- राघव नाथ झा, दरभङ्गा।**
कामेश्वरसिंह- दरभङ्गा- संस्कृतविश्वविद्यालये भारतीय- ज्ञान- परम्परायाः, सांस्कृतिकचेतनायाः, राष्ट्रबोधस्य च विषये संकलितायाः 'प्रबुद्धभारतम्' इति स्मारिकायाः लोकार्पणसमारोहः समनुष्ठितः। समारोहेऽस्मिन् भारतीयज्ञानपरम्परायाः वर्तमाने युगे प्रासङ्गिकतां प्रतिष्ठापयितुं युवापिढ्याः च अनया सह संयोजनार्थं विशेषः बलो दत्तः।
कार्यक्रमस्य मुख्यवक्ता प्रज्ञाप्रवाहस्य अखिलभारतीय- सहसंयोजकः चन्द्रकान्तः अवदत् यत् भारतीयज्ञानपरम्परा देशस्य सांस्कृतिक- परिचयस्य आधारभूता वर्तते। नूतनपिढीं स्वकीयाम् एतां समृद्धां बौद्धिकविरासतां प्रति उन्मुखीकरणं कालस्य महती आवश्यकता अस्ति। सः अकथयत् यत् भारतं केवलं पाश्चात्यदृष्ट्या न, अपितु भारतीयदृष्ट्या, चिन्तनेन, जीवनदर्शनेन च अवगन्तव्यम्। सः भारतीयज्ञानपरम्परायाः, सांस्कृतिकचेतनायाः, राष्ट्रबोधस्य तथा भारतस्य समृद्धबौद्धिकपरम्परायाः विविधेभ्यः आयामेभ्यः विस्तारपूर्वकं प्रकाशम् अकिरत्।
समारोहस्य अध्यक्षतां कुर्वन् कामेश्वरसिंह- दरभङ्गा- संस्कृतविश्वविद्यालयस्य कार्यकारी कुलपतिः प्रो. दिलीपझाः अवदत् यत् भारतीयज्ञानपरम्परा केवलं भूतकालस्य दायभागः एव नास्ति, अपि तु वर्तमानस्य भविष्यस्य च निर्माणार्थं सुदृढः आधारोऽपि अस्ति। संस्कृतविश्वविद्यालयानां सदृशानां संस्थानां दायित्वं वर्तते यत् भारतीयज्ञान- दर्शन- साहित्य- संस्कृति- जीवनमूल्यैः सम्बद्धाः विमर्शाः शैक्षणिकजगति व्यापकरूपेण प्रसारणीयाः।
सः अकथयत् यत् युवानः भारतीयज्ञानपरम्पराभिः सह परिचायनीयाः, तथैव तेषां समकालीन- प्रासङ्गिकतायाः अवबोधनम् अपि आवश्यकम्। 'प्रबुद्धभारतम्' इति स्मारिकायाः प्रकाशनं सः भारतीयचिन्तनस्य सांस्कृतिकचेतनायाः च अभिव्यक्तिपरं सार्थकं प्रयासं निरूपितवान्। विशिष्टातिथिः कुलसचिवः डॉ. दिनेशझाः अवदत् यत् भारतीयसंस्कृतेः मूलशक्तिः तस्याः ज्ञानसम्पत्तौ, चिन्तनपरम्परायां, विविधतायां च अन्तर्निहितायाम् एकात्मदृष्टौ वर्तते। अद्यतनसमये आवश्यकता अस्ति यत् युवानः भारतीय- ज्ञान- परम्परां केवलम् इतिहासदृष्ट्या न पश्येयुः, अपितु तस्याः जीवनोपयोगिनः समकालीनपक्षानपि अवगच्छेयुः। सः एतां स्मारिकां संवादस्य विमर्शस्य च उपयोगी माध्यमम् अवदत्। विश्वविद्यालयस्य जनसम्पर्काधिकारी डॉ. निशिकान्तः अवदत् यत् सम्पूर्णे कार्यक्रमे भारतीयज्ञानपरम्परायाः वर्तमानसन्दर्भे तस्याः उपयोगितायाः चोपरि विशेषः अवधानः दत्तः। स्वागतभाषणं डॉ. लक्ष्म्या दत्तम्। सा अतिथीनां स्वागतं कुर्वती 'प्रबुद्धभारतम्' इत्यस्य प्रकाशनस्य पृष्ठभूमिम् उद्देश्यं च स्पष्टीकृतवती। कार्यक्रमस्य सञ्चालनं डॉ. अनुरागमिश्रेण कृतम्।
समारोहेऽस्मिन् विश्वविद्यालयस्य अधिकारिणः, आचार्याः, शोधच्छात्राः, विद्यार्थिनः, कर्मचारिणः च विपुलसंख्यायाम् उपस्थिताः आसन्। प्रसारमाध्यमप्रतिनिधिभिः सह राष्ट्रिय- स्वयंसेवक- सङ्घस्य पदधारिणः कार्यकर्तारश्च अपि समुपस्थिताः अभवन्। अन्ते भूतपूर्वविधिपदाधिकारी डॉ. कृष्णानन्दमिश्रः धन्यवादार्पणम् अकरोत्। सः अवदत् यत् 'प्रबुद्धभारतम्' सदृशः प्रयासः भारतीय- ज्ञान- परम्परायाः, सांस्कृतिकचेतनायाः, राष्ट्रबोधस्य च सम्बद्धविमर्शं व्यापकं कर्तुं दिशि महत्त्वपूर्णं सोपानम् अस्ति।



## समृद्ध-बिहार-निर्माणाय सर्वेषां सहभागिता आवश्यकी : मुख्यमन्त्री सम्राट-चौधरी
## शिक्षा-संरचना-सांस्कृतिक-परम्पराणां विकासाय राज्यसर्वकारः निरन्तरं प्रयतते; 'विकसित-बिहार-सम्मेलने' मुख्यमन्त्रिणः सम्बोधनम्

**पाटलिपुत्रम् हिमसंस्कृतवार्ताः राघव नाथ झा**
बिहारस्य मुख्यमन्त्री सम्राट-चौधरी सम्राट-अशोक-कन्वेंशन-केन्द्रस्थे बापू-सभागारे प्रोग्रेसिव-बुद्धिजीवी-एसोसिएशन-पक्षतः आयोजिते 'विकसित बिहारः नींव से निर्माण तक' महामन्थन-सह-लव-कुश-प्रतिभा-सम्मान-समारोहे दीपप्रज्वालनेन कार्यक्रमस्य उद्घाटनम् अकरोत्। अस्मिन् अवसरे सः राज्यस्य समृद्धये सर्वेषां नागरिकाणाम् एकतायाः सहभागितायाश्च आह्वानं कृतवान्।
मुख्यमन्त्रिणा प्रतिपादितं यत् बिहारस्य ऐतिहासिक-गौरवम् अनुपमं वर्तते। चन्द्रगुप्तमौर्य-सम्राट-अशोकादिभिः महापुरुषैः अस्मादेव भूभागात् विश्वस्य मार्गदर्शनं कृतम्। सः अवदत् यत् विगतवर्षेषु बिहारस्य अर्थव्यवस्थायां संरचनायां च युगान्तकारी परिवर्तनं जातम्। अद्य राज्यस्य बजट-राशिः ३ लक्ष १७ सहस्रकोटि-रूप्यकाणि अतीत्य विकासस्य नूतनमानाङ्कान् स्थापयति।
शिक्षाक्षेत्रे जातः विकासः उल्लिख्य सः न्यवेदयत् यत् राज्ये २११ स्नातक-महाविद्यालयेषु पठन-पाठनं प्रारब्धम्, सप्तशतं (७००) आदर्श-विद्यालयाः सञ्चालिताः, तथा च 'विद्यार्थी साथी' अन्तर्जाल-माध्यमेन (App) सहस्रशः छात्राः शिक्षाम् अर्जयन्ति। सांस्कृतिक-पुनरुत्थानाय बोधगयायां भव्य-गलियारा (Corridor), वाल्मीकिनगरे षष्टिकोटि-व्ययेन 'लव-कुश-उद्यानम्', सीतामढ्यां च सहस्रकोटि-व्ययेन निर्माणाधीनस्य भव्य-सीता-मन्दिरस्य कार्यं २०२८ वर्षस्य अन्तं यावत् पूर्णं भविष्यति। एकतायाः महत्वं प्रतिपादयन् मुख्यमन्त्री पञ्चानाम् अङ्गुलीनां मुष्टि-दृष्टान्तेन समाजस्य सामूहिक-शक्तिं प्रशंसितवान्। समारोहे मुख्यमन्त्रिणा उत्कृष्टकार्याय प्रशासनिक-अधिकारिणः सम्मानिताः तथा च 'स्वर्णिम दिन सम्राट के' नामिकायाः स्मारिकायाः विमोचनमपि कृतम्। कार्यक्रमे मन्त्रिणः, सांसदाः, विधायकाः, विद्वांसश्च महत्या संख्यया उपस्थिताः आसन्।

# हरियाणाप्रदेशस्य कुरुक्षेत्रस्थे श्रीकृष्णायुषविश्वविद्यालये केन्द्रीय- संस्कृत- विश्वविद्यालयस्य मुक्तस्वाध्यायपीठेन सञ्चालितं संस्कृताध्ययकेन्द्रं समुद्घाटितम्




- **संस्कृतसूत्राणां सुभाषितानां च निरन्तरं स्मरणेन चिन्तनेन मननेन च अस्माकं अवचेतनमनसि प्रेरणा उत्पद्यते। पुनश्च शनैः शनैः सा प्रेरणा अस्माकं चेतनमनसि व्यवहारे च मूर्तरूपेण परिणता भवति- कुलपतिः, प्रो. वैद्यः करतारसिंहधीमान्**
- **संस्कृतम् आयुर्वेदस्य आत्मतत्त्वं वर्तते। संस्कृतेन विना आयुर्वेदसंहितानाम् अवगमनं न शक्यते। अतः आयुर्वेदाध्ययनाय संस्कृतज्ञानं परमावश्यकः - प्राचार्यः, प्रो. आशीषः मेहता**
- **संस्कृतग्रन्थेषु लिखितानि सुभाषितानि अस्माकं जीवनाय उत्तमां प्रेरणां प्रयच्छन्ति। संस्कृतभाषायाः व्याकरणम् अत्यन्तं वैज्ञानिकं सुव्यवस्थितं च अस्ति। अतः संस्कृतं सार्वकालिकी सार्वदेशिकी सार्वभौमिकी चात्यन्तं समृद्धा ज्ञानविज्ञानयोः भाषा वर्तते- आचार्यः भूपेन्द्रशर्मा, प्रान्तसहमन्त्री, संस्कृतभारती, हरियाणा**
- **संस्कृतभाषा भारतीयसंस्कृतेः सम्पोषिका, भारतीयभाषाणां जीवनदायिनी प्राणशक्तिः, भारतीयज्ञानपरम्परायाः आधारशिला च वर्तते। संस्कृताध्ययनेन मानवस्य आत्मविकासः, बौद्धिकविकासः, चारित्रिकविकासश्च सम्भवति। शिक्षायाः उद्देश्यमपि मनुष्यस्य सर्वाङ्गीणः विकासः वर्तते- आचार्यः विशालप्रसादभट्टः**

**हिमसंस्कृतवार्ताः- कुरुक्षेत्रं, हरियाणा**
संस्कृताध्ययनम् एवम् अनुसन्धानसंस्थानम्, श्रीकृष्णायुष- विश्वविद्यालयः, कुरुक्षेत्रम् इत्यस्मिन् केन्द्रीय- संस्कृत- विश्वविद्यालयस्य मुक्तस्वाध्यायपीठेन सञ्चालितस्य संस्कृताध्ययन-केन्द्रस्य समुद्घाटनकार्यक्रमः त्रिदिवसीयः संस्कृतपरिचयवर्गश्च समारब्धोऽभवत्। तत्रादौ कार्यक्रमस्य शुभारम्भः समागतातिथिभिः मङ्गलाचरणपुरस्सरं दीपप्रज्ज्वालनेन शारदासमर्चनेन विहितः। तदनन्तरं संस्थानस्यास्य छात्रैः मधुरस्वरेण सरस्वतीवन्दना प्रस्तुता। कार्यक्रमोऽयं राष्ट्रगीतं वन्देमातरमित्येतस्य समवेतगानेन समारब्धः। तदनु सर्वेषां मञ्चस्थातिथिनां स्वागतं पुष्पगुच्छप्रदानेन "साइन्स इन संस्कृतम्" इति पुस्तकसमर्पणेन कृतम्। तदनु संस्कृताध्ययनम् एवम् अनुसन्धानसंस्थानस्य प्राचार्यः डॉ. आशीषः मेहता स्वीये स्वागतभाषणे संस्कृताध्ययनकेन्द्रस्य महत्त्वं प्रतिपाद्य संस्कृतभाषा- प्रमाणपत्रीयपाठ्यक्रमे प्रवेशं स्वीकर्तुं समुपस्थितान् शिक्षकान् छात्रान् च प्रेरितवान्। तदनन्तरं केन्द्रशिक्षकः आचार्यः विशालप्रसादभट्टः प्रास्ताविकोद्बोधने केन्द्रीय- संस्कृत- विश्वविद्यालयस्य मुक्तस्वाध्यायपीठेन आभारतम् आधुनिकोच्चसंस्थासु सञ्चालितानां संस्कृताध्ययनकेन्द्राणां परिचय-पुरस्सरं संस्कृतभाषा- प्रमाणपत्रीय- पाठ्यक्रमस्य महत्त्वं प्रतिपाद्यच समर्थपटलमाध्यमेन प्रवेशं स्वीकर्तुं सर्वान् शिक्षकान् छात्रान् च सम्प्रेरयत्। कार्यक्रमस्य मुख्यातिथिः संस्कृतभारत्याः हरियाणाप्रान्तस्य सहप्रान्तमन्त्री आचार्यः भूपेन्द्र शर्मा प्रोक्तवान् यत् संस्कृतस्य महिमानं सर्वे जानन्ति एव परन्तु इदानीं संस्कृतं व्यवहारपथि आनयनस्य आवश्यकता वर्तते। तदर्थं संस्कृतेन सम्भाषणं करणीयम्। संस्कृतम् अस्माकं दैनन्दिनजीवनस्य व्यवहारभाषा भवेत्। तदर्थम् एतत् संस्कृताध्ययनकेन्द्रं समुद्घाटितं वर्तते। अस्मिन् पाठ्यक्रमे भवन्तः सर्वे प्रवेशं स्वीकृत्य सरलतया संस्कृतसम्भाषणं शिक्षितुं शक्नुवन्ति। संस्कृतभाषाशिक्षणेन भवन्तः आयुर्वेदग्रन्थान् इतोऽपि सम्यक्तया अवगन्तुं शक्ष्यन्ति। वयं भारतीयाः इत्यस्मात् वयं सश्रद्धं संस्कृतं पठेम। तदनु श्रीकृष्णायुषविश्वविद्यालयस्य माननीयः कुलपतिः प्रो. वैद्यः करतारसिंह धीमान् स्वीये अध्यक्षीयोद्बोधने कथितवान् यत् आयुर्वेदसंहितासु विद्यमानसूत्राणां श्लोकानां च परिज्ञानाय अर्थावबोधाय च संस्कृतभाषाज्ञानं परमावश्यकं वर्तते। संस्कृताध्ययनं केवलं पराक्षोत्तीर्णतायै प्रमाणपत्रप्राप्तये सीमितं न भवेत्। अपि तु संस्कृतस्य सूत्राणि जीवने आचरणाय सन्ति। तदनु कुलपतिवर्यः सर्वेभ्यः छात्रेभ्यः शिक्षकेभ्यश्च शुभकामनाः समर्प्य सोत्साहं संस्कृताध्यनाय सम्प्रेरयत्। कार्यक्रमस्य सफलं सञ्चालनं डॉ. रिद्धिः कृतवती। कार्यक्रमेऽस्मिन् कुलानुशासकः प्रो. सतीशवत्सः, प्रो. दीप्ति पाराशरः, संस्कृताध्ययनकेन्द्रस्य केन्द्राधिकारिणी डॉ. लसिता सनल, डॉ. कृष्णकुमारः, डॉ. सीमा रानी, विश्वविद्यालयस्य नैके प्राध्यापकाः, कर्मचारिणः, छात्रछात्राश्च उपस्थिताः आसन्

**रविः खरिडेहालः - बेङ्गलूरु।**

## "मुक्तव्यापारसम्मतेन आगामिवर्षेषु तिरुप्पुर-नगरात् द्विगुणीभविष्यति"

तिरुप्पुर-नगरं ग्रंथवस्त्राणां कृते प्रसिद्धिः अस्ति।५५% भारतीय ग्रंथवस्त्राणां निर्यातः तिरुप्पुर-नगरात् अस्ति ।ते वैश्विकमुद्राङ्कितानां कृते वस्त्रनिर्माणं कुर्वन्ति।तिरुप्पुर-वस्त्रनिर्मातृणां कृते अमेरिका, ब्रिटेन, यूरोप च मुख्याः विपणयः सन्ति।अमेरिका-यूरोपयोः संयुक्तः आपण-भागः चत्वारिंशत् प्रतिशतम् अस्ति।तिरुप्पुर्-औद्योगिकागाराणि कठोरविनिर्देशानां, यन्त्रागार-परीक्षणानां तथा च वैश्विकक्रेतॄणाम् आवश्यकतानां अनुपालनं कुर्वन्ति। प्राइमाक-मार्क्स-एण्ड-स्पेंसर-नेक्स्ट-मदरकेयर-इत्यादयः प्रमुखाः यूके-ईयू-वाणिज्यमुद्राः तिरुप्पुरतः वस्तूनि प्राप्नुवन्ति। वर्तमानकाले यूके-ईयू देशयोः कृते भारतस्य निर्यातस्य मूल्यं १६००० कोटिरूप्यकाणि अस्ति। मुक्तव्यापारसम्मतेन (FTA) सह आगामिवर्षेषु इदं द्विगुणीभविष्यति।



# यदा संस्कृतविद्वांसः अभवन् आधुनिकसंवादस्य साधकाः

## अष्टचत्वारिंशत् मासाः, षष्ट्यधिक-सप्तशतं होराः अष्टचत्वारिंशत् शिबिराणां च अनवरतसाधना।

## बिहारप्रदेशात् प्रारब्धम् 'आधुनिको भव संस्कृतं वद' इत्याभियानम्।

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्

संस्कृतस्य विद्वत्ता केवलं ग्रन्थानामध्ययने एव सीमिता न भवेत्, अपि तु संस्कृतज्ञाः विद्यार्थिनश्च आधुनिकसञ्चारमाध्यमैः सह पदं निक्षिपन्तः संस्कृतेन सहजसंवादस्य साधकाः अपि भवेयुः इत्येतं विचारं व्यवहारे परिणमयितुं विगतचतुर्वर्षेभ्यः निरन्तरं प्रयासः प्रचलति। बिहार- संस्कृत- संजीवन- समाजस्य तत्त्वावधाने सञ्चालितम् 'आधुनिको भव संस्कृतं वद' इत्याभियानम् अधुना स्वकीयं 'महायोगी गोपीचन्दस्मृतिः संस्कृतशिक्षण एवं सम्भाषणशिबिरम्' इति अष्टचत्वारिंशत्तमं शिबिरं यावत् प्राप्तवत् अस्ति।

अद्य आयोजिते अष्टचत्वारिंशत्तमे शिबिरे संस्कृतसम्भाषणस्य उपयोगिता, चतुर्वर्षाणां सतता यात्रा, आधुनिकान्तर्जालमाध्यमस्य प्रयोगः तथा च संस्कृतम् अध्ययनात् अग्रे नीत्वा व्यवहारस्य सम्भाषणस्य च भाषात्वेन प्रतिष्ठापनविषये विशेषचर्चा अभवत्। शिबिरसम्बद्धाः सदस्याः संस्कृतेन स्वविचारान् प्राकटयन्, अस्यां वार्तायां च बलं प्राददुः यत् संस्कृतस्य जीवन्तता तदीयानां साहित्यशास्त्राणां संरक्षणेन सहैव तस्य नित्यप्रयोगेण सम्भाषणेन च स्थिरा भविष्यति।

## पञ्चदशसहभागिभिः प्रारब्धः प्रवासः

अस्याभियानस्य प्रथमं शिबिरं २०२२ तमवर्षस्य सितम्बरमासस्य २२ दिनाङ्कतः अक्टूबरमासस्य प्रथमदिनाङ्कं यावत् आयोजितम् आसीत्। 'शान्तीदेवी-सिद्धेश्वर-ओझास्मृति-संस्कृतसम्भाषणशिबिरम्' इति नाम्ना प्रारब्धेऽस्मिन् प्रथमायोजने केवलं पञ्चदश सदस्याः सहभागिनः आसन्। ततः लघ्व्या आरम्भिकया व्याप्त्या नियमितशिबिराणां क्रमः निरन्तरम् अग्रेसरः सन् अधुना अष्टचत्वारिंशत्तमं शिबिरं सम्प्राप्तवान्।

अस्य अभियानस्य महत्तमं वैशिष्ट्यं न केवलं शिबिराणां सङ्ख्या, अपितु चतुर्वर्षाणां नियमितता अस्ति। प्रत्येकं मासं ११ दिनाङ्कतः २१ दिनाङ्कं यावत् रात्रौ सार्ध-अष्टवादनात् दशवादनं यावत् अन्तर्जालमाध्यमेन संस्कृतशिक्षणस्य सम्भाषणस्य च अभ्यासः क्रियते। यदि प्रत्येकं शिबिरं दशदिनात्मकं प्रतिदिनं च द्विहोरात्मकं मन्येत, तर्हि अष्टचत्वारिंशत्सु शिबिरेषु प्रायः षष्ट्यधिक-नवशतं (९६०) होराणां सामूहिकसम्भाषणाभ्यासस्य क्रमः सिध्यति। अर्थात् चतुर्षु वर्षेषु संस्कृताय केवलम् आयोजनानि न जातानि, अपि तु प्रायशः सहस्रं होराः यावत् संस्कृतस्य श्रवण-भाषण-संवादेषु प्रयोगस्य सतता साधना अभवत्।

'आधुनिको भव' परम्परायाः आधुनिकतां प्रति न, अपितु परम्परा-आधुनिकतयोः समन्वयम् उद्दिश्य अभियानस्य 'आधुनिको भव, संस्कृतं वद' इति नामधेयमेव अस्य कार्यदृष्टिं विशदीकरोति। अस्योद्देश्यं संस्कृतस्य परम्परां विहाय आधुनिकतास्वीकरणं नास्ति, अपि तु आधुनिकप्रविधिं सञ्चारसाधनानि च अङ्गीकृत्य संस्कृतं वर्तमानजीवनस्य संवादेन सह संयोजयितुम् अस्ति।अद्य यदा अन्तर्जालमाध्यमं शिक्षायाः, संवादस्य, ज्ञानविनिमयस्य च महत्त्वपूर्णं साधनं जातम्, तादृशे काले संस्कृतसम्भाषणं तस्मिन्नेव माध्यमे नैरन्तर्येण सञ्चालयितुम् अस्याभियानस्य विशिष्टता अस्ति। संस्कृतविदुषः छात्रांश्च आधुनिकमञ्चे संस्कृतेन सम्भाषितुम् अवसरं प्रदाय अयं प्रयासः शास्त्रीयपाण्डित्यस्य व्यावहारिकभाषाप्रयोगस्य च मध्ये सेतुबन्धनं कुर्वन् अग्रे सरति। संस्कृतपाठकाः न, अपि तु संस्कृतवाचकाः साधकाः निर्मातव्याः। शिबिरं सम्बोधयन् अभियानस्य प्रधानसंरक्षकः उत्तरप्रदेशशासनस्य भूतपूर्वगृहसचिवश्च डॉ. अनिलकुमारसिंहः अवदत् यत् संस्कृते रुचिः तदैव व्यापकरूपं ग्रहीतुं शक्नोति, यदा अध्ययनेन सह सम्भाषणस्य व्यवहारस्य चापि अभ्यासः स्यात्। सः न्यवेदयत् यत् शिबिरसम्बद्धाः बहवः सदस्याः प्रतियोगितापरीक्षासु सफलतां प्राप्तवन्तः।

अभियानस्य राष्ट्रीयाध्यक्षः बिहार- संस्कृत- संजीवन- समाजस्य महासचिवश्च डॉ. मुकेशकुमार ओझा अभियानस्य चतुर्वार्षिकयात्रायाः नियमित-शिबिराणां च सातत्योपरि प्रकाशम् अकिरत्। सः अकथयत् यत् संस्कृतं जीवन्तं स्थापयितुं तस्याध्ययनेन सह सम्भाषणस्य वातावरणं निरन्तराभ्यासश्च अनिवार्यौ स्तः।

अद्यतने शिबिरे प्रतिभागिनः स्वकीयविचारान् संस्कृतेन उपास्थापयन्। सम्भाषणे इयं वार्ता प्राधान्येन समागता यत् संस्कृतं केवलं पाठ्यक्रमे, परीक्षासु वा शास्त्रीयाध्ययने एव सीमितं न मत्वा दैनिकसंवादे तस्य प्रयोगः विस्तारणीयः।

## चतुर्वर्षसाधनायाः राष्ट्रियं सोपानम्- देहल्यां पुनः भविष्यति दीक्षान्तः

अस्मिन् अभियाने प्रत्येकं द्वादशशिक्षण-सम्भाषणशिबिराणां शृङ्खलापूर्तेः अनन्तरं दीक्षान्तसमारोहस्य आयोजनपरम्परा वर्तते। प्रथमः दीक्षान्तसमारोहः लखनऊनगरे सम्पन्नः अभवत्। द्वितीयः दीक्षान्तसमारोहः २०२४ तमे वर्षे देहलीविश्वविद्यालयस्य संस्कृतविभागे सञ्जातः। तृतीयः दीक्षान्तसमारोहः राजकीय- संस्कृत- महाविद्यालये (काजीपुरम्) सम्पन्नः।

सम्प्रति चतुर्थः दीक्षान्तसमारोहः आगामिनि २०२६ वर्षस्य दिसम्बरमासस्य षष्ठे दिनाङ्के देहलीस्थे दौलतराममहाविद्यालये आयोजितो भविष्यति। अनेन प्रकारेण देहल्याम् अभियानस्य अयं द्वितीयः दीक्षान्तसमारोहः स्यात्। बिहारप्रदेशात् प्रारब्धा इयं संस्कृतसम्भाषणयात्रा अधुना राष्ट्रियराजधान्यां पुनः स्वसाधकान्, विदुषः, संस्कृतप्रेमिणश्च एकत्र मञ्चे आनयिष्यति।

## सर्वेभ्यः शिबिरसाधकेभ्यः प्रदास्यते 'डॉ. मिथिलेशकुमारीमिश्र- साधकसम्मानः'

चतुर्थदीक्षान्तसमारोहस्य प्रमुखवैशिष्ट्येषु 'डॉ. मिथिलेशकुमारीमिश्र- साधकसम्मानः' अपि अन्तर्भवति। बिहार- संस्कृत- संजीवनसमाजेन 'आधुनिको भव संस्कृतं वद' अभियानान्तर्गते आयोजितानां सर्वेषां शिबिराणां सम्बद्धसदस्याः अनेन सम्मानेन सम्मानिताः भविष्यन्ति।अयं सम्मानः कस्याञ्चिदेकस्यां गोष्ठ्यां सहभागितामात्रस्य न, अपि तु चतुर्वर्षाणि यावत्




संस्कृतसम्भाषणस्य नियमितसाधनायाः, सहभागितायाः, सततनैरन्तर्यस्य चाभिनन्दनं भविष्यति। अनेन अभियाने सहभागिनां साधकानां योगदानं सार्वजनिकलक्षणेन अङ्कितं भविष्यति।

## बिहारात् उद्भूतम् अभियानं राष्ट्रियस्तरे कृतवत् सहभागिताम्

संस्कृतस्य प्रचाराय प्रसाराय च देशस्य विविधेषु क्षेत्रेषु बह्व्यः संस्थाः निरताः सन्ति। अस्मिन् व्यापके परिदृश्ये बिहार- संस्कृत- संजीवन-समाजस्य अयं प्रयासः स्वकीयेन मासिकनैरन्तर्येण अन्तर्जालीयसम्भाषणाभ्यासेन च विशिष्टां परिचयं प्राप्नोति। बिहारात् आरब्धः उपक्रमः लखनक-देहली- पाटलीपुत्रान्ताम् आत्मनः दीक्षान्तपरम्परां प्रापयत्, अधुना च देहल्यां द्वितीयवारं समारोहः सम्पत्स्यते।अभियानस्य दृष्ट्या संस्कृतसेवा इत्यस्य अर्थः केवलं संस्कृतं प्रति आदरप्रदर्शनं न, अपितु जीवनव्यवहारे संस्कृतस्य प्रयोगस्थापनम् अस्ति। अत एव चतुर्वर्षाणि यावत् निरन्तरं प्रवृत्तानि शिक्षण- सम्भाषणशिबिराणि अस्य अभियानस्य वास्तविककार्यसम्पत्तिरूपेण प्रकाशन्ते।कार्यक्रमस्य अध्यक्षता डॉ. मुकेशकुमार- ओझामहोदयेन कृता। अस्मिन्नवसरे अभियानस्य प्रधानसंरक्षकः डॉ. अनिलकुमारसिंहः, संरक्षकः धर्मेन्द्रपतित्रिपाठी, वरिष्ठसंस्कृतप्रचारकः संरक्षकश्च डॉ. मिथिलेशझा, डॉ. अनिलकुमारचौबे, शैलेन्द्रकुमारसिंहः, राष्ट्रियसंयोजिका प्रो. रागिनीवर्मा, राष्ट्रियोपाध्यक्षौ उग्रनारायणझा, डॉ. लीनाचौहानसहिताः बहवः सदस्याः समुपस्थिताः आसन्।कार्यक्रमेऽस्मिन् डॉ. नीराकुमारी, डॉ. दीप्तिकुमारी, मनीषकुमारः, डॉ. एकतावर्मा, डॉ. आशीषकुमारः, डॉ. विश्वजीतरुद्रपालः, मुरलीधरशुक्लः, ताराविश्वकर्मा, विजेन्द्रसिंहः, दयानीशारदे, ज्ञानीशारदे, मोनिकाझा, डॉ. राघवनाथझा, उमाहेनोते, वन्दनापटेरिया इत्येतादृशाः शिबिरसदस्याः समुपस्थिताः अभवन्। डॉ. अनिलकुमारचौबेमहोदयः संस्कृतगीतमाध्यमेन अधिकाधिकान् जनान् संस्कृतसम्भाषणाभियानेन सह संयोजितुम् आह्वानम् अकरोत्।

पञ्चदशसहभागिभ्यः आरभ्य अष्टचत्वारिंशत्तमं शिबिरं षष्ट्यधिक-नवशतहोराणां सम्भाषणाभ्यासं च सम्प्राप्ता इयं यात्रा केवलम् एकस्याः संस्थायाः कार्यविवरणं नास्ति, अपि तु संस्कृतम् आधुनिक-जीवनस्य संवादेन योजयितुम् एका सतता प्रक्रिया वर्तते। चतुर्णां वर्षाणाम् एषा साधना प्रतिपादयति यत् यदि संस्कृतपरम्परा आधुनिकप्रविधिना युज्येत, तर्हि विद्वत्ता केवलं पुस्तकेषु एव बद्धा न तिष्ठति, अपितु संवादमाध्यमेन आगामिपिढीं यावत् जीवन्तरूपेण सङ्क्रमितुं शक्नोति।

# अगस्त्यार्घ्यप्रदान-पार्वणश्राद्ध-महालयानां शास्त्रीयविवरणम्



- ज्योतिषाचार्यः डॉ. राजनाथ झा
निदेशकः, ज्योतिर्वेदविज्ञान-संस्थानम्, पाटलिपुत्रम्

*२६ सितम्बरदिनाङ्के अगस्त्याय अर्घ्यसमर्पणम्, २७ तः पार्वणश्राद्धारम्भः। ३ अक्तूबर-तिथौ सप्तम्यष्टमी- श्राद्धद्वयम्, १० अक्तूबरदिने च सर्वपितृ- अमावास्यायां महालयानुष्ठानम्*

पितृणाम् अपचितये, देव-ऋषि-पितृणां त्रिविध-ऋणविमुक्तये, कुलक्रमपरम्परायाः परिपालनाय च प्रशस्तः पितृपक्षः अस्मिन् वत्सरे २६ सितम्बर-दिनाङ्कात् समुपागच्छति। तत्र २६ सितम्बर-दिने अगस्त्यार्घ्यप्रदानात् परं २७ दिनाङ्कात् पितृपक्षीय-पार्वणश्राद्धानाम् अनुक्रमः प्रारप्स्यते। पितृणां मृताह-तिथ्यनुरोधेन पार्वणश्राद्ध- तर्पण-पिण्डदान- ब्राह्मणभोजन- सत्कार-दक्षिणादानादिकानि कर्माणि विधास्यन्ते। तिथीनां मानभेदात् ३ अक्तूबर-दिने कृष्णसप्तम्याः अष्टम्याश्च उभयोः पार्वणश्राद्धं युगपदेव सम्पादयिष्यते। तदनु १० अक्तूबरतिथौ सर्वपितृ-अमावास्यायां महालयान्वितस्य पितृपक्षस्य परिसमाप्तिः भाविनी।

**दक्षिणाभिमुखम् अगस्त्यमहर्षये अर्घ्यसमर्पणम्**

पितृपक्षस्य सङ्क्रमसमये महर्षये अगस्त्याय अर्घ्यप्रदानस्य विशेषः शास्त्रविधिः समुल्लसति। स्नानाचमनादिभिः शुचितामापन्नाः, धौतवस्त्रधराः, दक्षिणस्यां दिशि अभिमुखाः सन्तः सङ्कल्पपूर्वकं न्यञ्चितजानवः साधकाः अगस्त्याय अर्घ्यं ददति। शिष्टाचारपरम्परायां तस्य अर्घ्यपात्रस्य शिरसा स्पर्शोऽपि विधीयते। अस्मिन् अर्घ्ये तोयेन सह अक्षताः, कुशाः, दूर्वा, धवलकुसुमानि, विशेषतः काशपुष्पं च संयोज्यते।

अगस्त्य- अर्घ्यमन्त्रश्चायम्-

**काशपुष्पप्रतीकाश वह्निमारुतसम्भव।**
**मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते॥**

अर्थात् काशपुष्पवद् धवलकान्ते, हुताशन-समीरणाभ्यां समुद्भूत, मित्रावरुणयोस्तनय, हे कुम्भसम्भव मुने अगस्त्य! भवते साष्टाङ्गं नमस्कुर्मः।

**श्राद्ध- तर्पणयोः तात्त्विकः शास्त्रीयश्च भेदः**

धर्मशास्त्रमर्यादायां श्राद्धं तर्पणं च नैकानि कर्माणि। उदकेन पितृणां तृप्तिसम्पादनमात्रं 'तर्पणम्' इत्युच्यते; किन्तु स्वकीयपितृमरणतिथौ यथाविधि सङ्कल्पपूर्वकं क्रियमाणं षट्पिण्ड-द्वादशपिण्डादि- व्यापकं कर्म 'पार्वणश्राद्धम्' इति स्मर्यते। अस्मिन् पितृपूजनं, पिण्डनिर्वपणं, तर्पणविधिः, द्विजसत्कारः, श्राद्धभोजनं, भूरिदक्षिणा, दानादिकं च अन्तर्भवन्ति।

पितृतर्पणं प्राचीनावीती भूत्वा (अपसव्यरीत्या), दक्षिणदिक्मुखम् उपविश्य, तिल-कुशसमन्वितेन वारिणा सम्पाद्यते। अत्र पितृकुलेन सह मातृकुलस्यापि स्मरणं विहितम्। अस्मिन् कर्मणि सङ्कल्पवाक्यं, पितृगोत्र-प्रवर-नामसंकीर्तनं, देशकाल- कुलाचार- परिपालनं च नितराम् अपेक्ष्यते।

**२७ सितम्बर-प्रभृति तिथिपरिपाट्या पार्वणश्राद्धम्**

२७ सितम्बरदिने आश्विन-कृष्णप्रतिपत्तिथौ पार्वणश्राद्धस्य आरम्भः। ततः २८ दिनाङ्के द्वितीयायाः, २९ दिने तृतीयायाः, ३० दिने चतुर्थ्याः, १ अक्तूबरदिने पञ्चम्याः, २ दिने च षष्ठीतिथेः पार्वणश्राद्धं भवेत्।

३ अक्टूबर्-दिनाङ्के सप्तमी-अष्टमी-उभयोः श्राद्धं समाप्स्यते। ४ अक्तूबरदिने नवम्याः (अविहितनवम्याः वा मातृनवम्याः), ५ दिने दशम्याः, ६ दिने एकादश्याः, ७ दिने द्वादश्याः मघात्रयोदशी-संयोगे मघाश्राद्धस्य च, ८ दिने त्रयोदश्याः च विधानं भविष्यति। ९ अक्टूबर्-तिथौ चतुर्दश्याः (शस्त्रादिहतानाम्), १० अक्तूबरदिने च सर्वपितृ-अमावास्यायां महालयान्वितश्राद्धेन सह पक्षस्यास्य विधिवत् समापनं भविष्यति।

**मिथिलायाम् आचार-पञ्चाङ्गयोः प्रामाण्यम्**

मिथिलाक्षेत्रे पितृकर्मणि स्थानीयपञ्चाङ्गस्य, कुलाचारस्य, देशाचारस्य च प्रामाण्यं सर्वोपरि मन्यते। पितृणां चन्द्रतिथ्यनुरोधेनैव साकल्येन पार्वणकालस्य निर्वचनं क्रियते। अतः केवलं सौर-आङ्ग्लदिनाङ्कम् आश्रित्य कर्मप्रवृत्तेः अपेक्षया स्थानीयप्रामाणिकपञ्चाङ्ग-विहिततिथिम् अनुसृत्यैव पार्वणकालस्य निर्धारणम् उचितम्।

ज्योतिर्विदां प्रवरेण डॉ. राजनाथझामहोदयेन सयुक्तिकं प्रतिपादितं यत् पितृपक्षोऽयं न केवलं बाह्यकर्मकाण्डमात्रस्य समयः, अपि तु पूर्वज-समर्पित- संस्काराणां, ऋषिकल्पज्ञानस्य, कुलमर्यादायाः, जीवनमूल्यानां च प्रत्यवेक्षणस्य कृतज्ञताज्ञापनस्य च कालः। अगस्त्यार्घ्यात् आरभ्य सर्वपितृ- अमावास्यां यावत् अनुष्ठीयमानोऽयं विधिः पूर्वजैः सह सन्ततेः पारम्परिक-पारिवारिक-संस्काराविच्छिन्नतायाः शाश्वतं सन्देशं ददाति।

**विशेषः**- विभिन्नप्रदेशेषु देशाचार- कुलाचार-पञ्चाङ्गभेदात् तिथिविशेषे श्राद्धवेलायां वा किञ्चित् वैषम्यं सम्भाव्यते। तस्मात् स्वाधिकारक्षेत्रस्य प्रामाणिकपञ्चाङ्गं कुलगुरुपरम्परां च प्रमाणीकृत्यैव श्राद्धकालस्य निर्णयः कार्यः।

# वार्ता-संवादः

**नन्दिनी**- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या**- नमस्ते नन्दिनि। अतीव विचित्राः वार्ताः मया श्रुताः। येलोस्टोन-उद्याने एकः मार्जारः मार्गभ्रष्टः। मासद्वयानन्तरं सः मार्जारः कैलिफोर्निया-राज्ये प्राप्तः। तेन एकाकिना एव नवशत-मैल-परिमितः मार्गः अतिक्रान्तः।

**नन्दिनी**- आश्चर्यम्! मार्जारेण महान् सङ्कल्पः दर्शितः। अन्या वार्ता अपि श्रूयताम्। अस्माकं पृथिव्या एकः नूतनः क्षुद्रग्रहः आकृष्टः। सः मासद्वयं यावत् द्वितीयः चन्द्रः इव जातः। ततः सः पुनः अन्तरिक्षं गतः।

**काव्या**- अहो, पृथिव्या अपि नूतनं मित्रं प्राप्तम्! परन्तु मया एका अतीव हास्यकरी वार्ता पठिता। ओहायो-राज्ये अष्टवर्षीयया बालिकया पितुः यानं चालितम्। दश-मील-परिमितदूरं यानं चालयित्वा तया निश्चित- आपणः प्राप्तः। तत्र तया शीतकाफीपेयं क्रीतम्।

**नन्दिनी**- हह! बालिकया अतीव साहसं कृतम्। अन्ते, वैज्ञानिकानां विषये एका वार्ता। वैज्ञानिकैः एका अतीव प्राचीना अन्तरिक्ष-तरङ्ग-ऊर्जा प्राप्ता। अष्ट-अर्बुद-वर्षेभ्यः पूर्वं सा तरङ्ग-ऊर्जा उत्पन्ना। इदानीं सा पृथिव्यां प्राप्ता।

**काव्या**- सत्यम्, अतीव विचित्राः एताः घटनाः।



## "संस्कृतकथामञ्जरी" {२१}

### ।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।
### "मन्मथसञ्जीवनीवृत्तान्तो नाम पञ्चदशोपाख्यानम्" (२)

ततः राजा तेन सह तत्र स्थाने गतः। तत्र स्नानं विधाय लक्ष्मीनारायणं नत्वा तप्ततैलमध्ये पपात। तद्दृष्ट्वा तत्रत्यैस्तैर्जनैर्हाहाकारः कृतः। तदा राजशरीरं मांसपिण्डाकारमभूत्। तच्छ्रुत्वा मन्मथसञ्जीवनी अमृतम् आनीय मांसपिण्डस्य अभिषेकमकरोत्। ततः स राजा देवशक्त्या दिव्यरूपधरः पुरुषो जातः। ततः सा सुप्रसन्नचित्ता यावद्राजकण्ठे मालामर्पयति, तावद्राजा भणिता- भो मन्मथसञ्जीवनी! यदि त्वं मदीया भवसि तर्हि महत्वः श्रृणु। तयोक्तं भो स्वामिन्! निरूप्यतां, सर्वथा भवद्वचनं प्रतिपालयिष्याम्येव। राज्ञोक्तं- यदि मदुक्तं करिष्यसि तर्हि मत्पुरोहितं वृणीष्व। साऽपि तथाऽस्तु इत्युक्त्वा, पुरोहितकण्ठे मालां समर्प्य विवाहमकरोत्। अथ राजा स्वनगरं गतः। इमां कथां कथयित्वा पुत्तलिका भोजमवदत्- त्वय्येवं धैर्यं विद्यते चेत्, तर्ह्यस्मिन् सिंहासने समुपविश। राजा तूष्णीमासीत्।

डा. वर्षा प्रकाश टोणगांवकर
पुणे, महाराष्ट्रम्